
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. [illegible]/2265 विषय [illegible] साहित्य

नाव रघुवंशम् सर्ग 2-5, MSS

लेखक / लिपीकार महाकवि कालिदास

पृष्ठ ९५ काळ — पूर्ण / अपूर्ण

श्रीगणेशाय नमः ॥ आशासुराशीभवदंगवल्लीभासैव दासीकृतदुग्धसिंधु ॥ मंदस्मितैर्निंदि
तशारदेंदुं वंदेरविंदाननसुंदरि त्वा ॥ १ ॥ अथ निशानयनानंतरं यशोधनः प्रजानामधिपः प्रजेश्वरः
प्रभाते प्रातःकाले जायया सुदक्षिणया प्रतिग्राहितेन स्वीकारितेन गंधमाल्ये यया सा धेन्वा सा प्रतिग्रा
हितगंधमाल्यां तां तथोक्तां पीतं पानमस्तीति पीतः पीतवानित्यर्थः ॥ अर्शआदिभ्यो जित्यच्प्रत्ययः
॥ पीता गावो भुक्ता गावो भुक्ता ब्राह्मणा इति माहाभाष्ये दर्शनात् ॥ पीतः प्रतिबद्धो वत्सो यस्यास्तां च

॥ अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगंधमाल्यां ॥ वनाय पीतप्रतिबद्धवत्सां ॥
॥ यशोधनो धेनुमृषेर्मुमोच ॥ १ ॥ ७ ॥

षेर्धेनुं वनाय वनं गंतुं मुमोच ॥ क्रियार्थोपपदेत्यादिना चतुर्थी ॥ जायापदसामर्थ्यात् सुदक्षिणायाः
पुत्रजननयोग्यत्वमनुसंधेयं तथा हि श्रुतिः ॥ पतिर्जायां प्रविशति गर्भो भूत्वा स मातरं तस्यां पुन
र्नवो भूत्वा दशमे मासि जायते ॥ तज्जाया भवति तदस्यां जायते पुनरिति यशोधन इत्यनेन न पुत्रेण लोकोऽ
र्जितो नातू राजा नर्हे गोरक्षणे प्रवर्तत इति गम्यते ॥ अस्मिन् सर्गे प्रवृत्तमुपजातिः ॥ अनंतरस्वेदीरितिल
क्ष्मक्ष्माजौ यादौ यदीयावुपजातयस्ताइति ॥ १ ॥

तस्या इति ॥ पांसवो दोषा आसां संतीति पांसुलाः स्वैरिण्यः स्वैरिणी पांसुला चरया इत्यमरः ॥ सिध्मा
दिभ्यश्चेति लच्प्रत्ययः अपांसुलानां पतिव्रतानां धुरी अग्रे कीर्त्तनीया परिगणया सुनेश्वर धर्मपत्नी खुरं
न्यासैः पवित्रपांसु पवित्राः पांसवो यस्य तं रेणुर्द्वयोः स्त्रियां धुलिः पांसुर्ना न द्वयो रज इत्यमरः ॥ तस्याः
धेनोर्मार्गं स्मृतिः मन्वादिवाक्यं श्रुतेर्वेदस्यार्थं अभिधेयमिवान्वगच्छदनुसृतवती ॥ यथा स्मृतिः श्रु

॥ तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्त्तनीया ॥ मार्गं
॥ मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥२॥७॥

तिक्षुण्णमेवार्थं अनुसरति तथा सुदक्षिणापि गोखुरक्षुण्णमेव मार्गं अनुससारेत्यर्थः ॥ धर्मपत्नीत्य
त्राश्वघासादिवत्तादर्थ्ये षष्ठीसमासः ॥ प्रकृतिविकारभावत्वात्सुल न दत्तावश्य पांसुलानामिति वि
रोधालंकारो ध्वन्यते ॥२॥

राम
१

निवर्त्येति ॥ दयालुः कारुणिकः ॥ स्याद्दयालुः कारुणिक इत्यमरः ॥ स्पृगृही
त्यादीनामालु प्रत्ययः ॥ यशोभिः सुरभिः मनोज्ञः ॥ सुरभिः स्यान्मनोज्ञेपीति वि
श्वः ॥ स राजा दयितां निवर्त्य सौरभेयीं कामधेनुसुतां नंदिनीं धरंतीति धराः पय ॥

॥ निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ॥ पयोध
॥ रीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीं ॥ ३ ॥ ८७ ॥

धश्च ॥ पयसां धराः स्तनाः स्त्रीस्तनौ द्वौ पयोधरावित्यमरः ॥ अपयोधराः संपद्य
मानाः पयोधरीभूताः अभूततद्भावे च्विः ॥ कुगतिप्रादय इति समासः ॥ पयोधरीभूताश्च
त्वारः समुद्रा यस्यास्तां अन्येकेमन्यपदार्थे इत्यनेकपदग्रहणसामर्थ्यात्त्रिपदो बहुव्रीहिः ॥
गोरूपस्य धरामुर्वीमिव जुगोप ॥ ररक्ष भूतलं रक्षणप्रयत्नेनैव ररक्षेति भावः ॥ ३ ॥ ८७ ॥

व्रतायतेति॥ व्रतायधेनोरनुचरेण तेन दिलीपेन शेषोपि अवशिष्टोपि अनुयायिवर्गः
अनुचरवर्गः न्यषेधि निवर्तितः॥ शेषत्वं सुदक्षिणापेक्षया॥ कथं तर्हि आत्मरक्षणम
त आह॥ नचेति॥ तस्य दिलीपस्य शरीररक्षा न चान्यतः॥ पुरुषांतरात् कुतो हि यस्मा

॥ व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोप्यनुयायिवर्गः॥ न चान्यत
॥ स्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः॥४॥७॥

त्कारणात्॥ मनोः प्रसूयत इति प्रसूतिः संततिः स्ववीर्यगुप्ता स्ववीर्येणैव रक्षि
ता॥ न हि स्वीयनिर्वाहकस्य परापेक्षेति भावः॥४॥७॥

राम
२

आस्वादवद्भिरिति॥ सम्राट् मंडलेश्वरः॥ येनेष्टं राजसूयेन मंडलेश्वरश्च यः शास्ति यश्चाज्ञया राज्ञः सम्राऽथ राजकइत्यमरः॥ सराजा आस्वादवद्भिः स्वादयुक्तैस्तृणानां कवलैर्ग्रासैः कंडूयनैः घर्षणैः दंशानां वनमक्षिकाणां निवारणैश्च दंशास्तु वनमक्षिके

॥आस्वादवद्भिः कवलैस्तृणानां कंडूयनैर्दंशनिवारणैश्च॥ अव्या
॥हतस्वैरगतेः सतस्याः सम्राट् समाराधनतत्परोभूत्॥५॥७॥

त्यमरः॥ अव्याहतैस्वैरगमनैः स्वच्छंदगमनैश्चतस्याधेन्वाः समाराधनतत्परः सु श्रूषासक्तः अभूत्॥ तदेव परं प्रधानं यस्येति तत्परः प्रसक्तइत्यमरः॥५॥ ७॥

र॰ द्वि॰

सर्गः २

स्थितइति॥ भूपतिः प्रस्थितः निषेदुषीं तांगां स्थितां सतीं स्थितः सन् स्थितिरूर्ध्वावस्थानं प्रयातां प्रतिस्थितां उच्चलितः प्रस्थितः निषेदुषीं निषण्णामुपविष्टामित्यर्थः॥ आसनबंध धीरः जलमाददानां पिबंतीं जलाभिलाषीपिबन्नित्यर्थः॥ इत्थं छायेवाल्वगच्छत् अनुसृतवान्॥६॥

॥स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबंधधीरः॥ जलाभिलाषी॥
॥जलमाददानां छायेव तां भूपतिरन्वगच्छत्॥६॥ सन्यस्तचिन्हामपि राज्यल॥
॥क्ष्मीं तेजो विशेषानुमितां दधानः॥ आसीदनाविष्कृतदानराजिरंतर्मदावस्थइव॥
॥वद्विपेंद्रः॥७॥७॥

सन्यस्तइति॥ न्यस्तानि परिहृतानि चिन्हानि॥ छत्रचामरादीनि यस्यास्तां तथाभूतामपि तेजोविशेषणप्रभावातिशयेन अनुमितां सर्वथा राजा एवं भवेदिति हितां राजलक्ष्मीं दधानः स राजा अनविष्कृतदानराजिर्बहिरप्रकटितमदपंक्तिः अंतर्मदावस्थापस्यसो अंतर्मदावस्थस्तथाभूतो

रघुवंशटीका॥ रामाय॥

राम
३

लताप्रतानेति ॥ लतानां वल्लीनां प्रतानैः कुटिलतंतुभिः उद्ग्रथिताः ये केशाः तैरुपलक्षितः
इत्थंभूतलक्षणे इति तृतीया ॥ स राजा अधिराज्यमारोपितं औविकं धनुर्येन सोऽधिज्यधन्वा
सन् धनुषश्चेनउनदेशाः ॥ मुनिहोमधनोः रक्षापदेशात् रक्षणव्याजात् वन्यान् वने भवान् दुष्ट

॥ लताप्रतानोद्ग्रथितैः सकेशैरधिज्यधन्वा विचचार दावं ॥ रक्षापदेशा ॥
॥ न्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्वान् ॥ ८ ॥ ७ ॥

सत्वान् दुष्टजंतून् ॥ सत्वमस्त्री दुष्टजंतुरित्यमरः ॥ विनेष्यन्निव शिक्षयिष्यन्निव दावं
वनं विचचार ॥ वने चचारेत्यर्थः ॥ देशकालाध्वगंतव्यः कर्मसंज्ञा ह्यकर्मणामिति दावस्य
कर्मत्वं ॥ ८ ॥ ७ ॥

र॰ द्वि॰

सर्गः

विसृष्टेत्यादिषड्भिः श्लोकैस्तस्य महामहिमतया द्रुमादयोपि राजोपचारं चक्रुरित्याह ॥ विसृष्टेति ॥
विसृष्टाः पार्श्वानुचराः पार्श्ववर्तिनो जनाः येन तस्य पाशभृता वरुणेन समस्य तुल्यस्यानुभावो
अनेन सूचितः राज्ञः पार्श्वयो द्रुमाः उन्मादानामुत्कटमदानां वयसां खगवाल्यादिनोपर्वयद्दल
मरः ॥ विरावैरालोकशब्दे आलोकस्य ॥ ना शब्दवाचकं ॥ आलोकइतिशब्दमित्यर्थः ॥ उदीरया
मासुरिव उच्चारयामासुरिव इत्युत्प्रेक्षा ॥ ९ ॥ मरुदिति ॥ मरुता प्रयुक्ताः वायुना प्रेरिताः बालल

॥ विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ॥ उदीरयामासुरिवोन्मदा ॥
॥ नामालोकशब्दं वयसां विरावैः ॥ ९ ॥ मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिव ॥
॥ र्त्तमानं ॥ अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ॥ १० ॥ ॥ ७ ॥

ताः आरात्समीपं अभिवर्त्तमानं ॥ आराद्दूरात्समीपयोरित्यमरः ॥ मरुतो वायोः सखा तस्य अ
भेव अभा कांतिर्यस्य सः तं मरुत्सखाभं ॥ अर्च्यं पूज्यं तं दिलीपं प्रसूनैः पुष्पैः पौरकन्याः पौराश्च
ताः कन्याश्च आचारार्थैर्लाजैः भर्जितशालिविशेषैरवाकिरन्ववर्षुः ॥ तस्योपरि क्षिप्तवत्य इत्य
र्थः ॥ सखायमागतमुपवस्तीभावः ॥ १० ॥

राम
४

धनुर्भृत इति ॥ धनुः बिभर्तीति ॥ धनुर्भृतोप्यस्य राज्ञः एतेन भयसंभवनादर्शिता तथापि वि
शंकैर्निर्भीकैरंतःकरणैः तृभिः दयया कृपया आर्द्रः स्निग्धः भावो अभिप्रायो यस्य तत् दयार्द्र
भावं तदाख्यातं दयार्द्रभावमेतद्दित्याख्यातमित्यर्थः ॥ भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्म

॥ धनुर्भृतोप्यस्य दयार्द्रभावमाख्यातमंतःकरणैर्विशंकैः ॥ विलो ॥
॥ कयंत्योवपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ॥११॥

स्विति त्यमरः ॥ तथाविधं वपुर्विलोकयंत्यः हरिण्यः अक्ष्णं प्रकामं विस्तारस्यायत्वं तदि
त्यपरतायाः फलं आपुः प्रापुः ॥ विमलं कलुषीभवच्चेतः कथयंत्येव हितैषिणं रिपुं वेतिन्या
येन स्वांतःकरणप्रामाण्यादेव विनम्रं ददृशुरित्यर्थः ॥११॥

सकीचक इति॥ मारुतपूर्णैः अत एव कूजद्भिः कीचकैर्वेणुविशेषैः॥ वेणवः कीचकास्ते स्युर्ये
ये स्वनंत्यनिलोद्धता इत्यमरः॥ वंशः सुस्वर वाद्यविशेषः॥ वंशादिकं तु सुषिरं वाद्यं तु
लादिकं घनमित्यमरः॥ आपादितं संपादितं वंशस्य कृत्यं कार्यं यस्मिन्कर्मणि यथा भव
ति तथा कुंजेषु लतागृहेषु निकुंजकुंजौ वा क्लीबे लतादिपिहितोदर इत्यमरः॥ वनदेवताभिरु
द्गीयमानं स्वं यशः शुश्राव॥ श्रुतवान्॥१२॥ पृक्त इति॥ गिरिषु निर्झराणां प्रवाहाणां प्रवा

॥ सकीचकैर्मारुतपूर्णरंध्रैः कूजद्भिरापादितवंशकृत्यं॥ शुश्राव कुंजेषु यशः स्वमुच्चैः॥
॥ रुद्गीयमानं वनदेवताभिः॥१२॥ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्प॥
॥ गंधिः॥ तमातपक्लांतमनातपत्रमाचारपूतं पवनः सिषेवे॥१३॥

हो निर्झरोस्त्रियामित्यमरः॥ तुषारैः सीकरैः तुषारो हिमसीकराविल्यमरः॥ आकंपितः पृक्तः
संपृक्तः अनोकहवृक्षाणां अनोकहः कूटशालइत्यमरः॥ आकंपितानीषितानि पुष्पाणि
तेषां यो गंधस्यास्तीति गंधिः॥ तथोक्तः पुष्पगंधिः ईषत्कंपिताः पुष्पवानेवं शीतो मंदः सुरभिः
पवनः वायुः अनातपत्रं व्रतार्थं परिहृतछत्रं अत एवातपक्लांतं आचारेण पूतं शुद्धं तं नृपं सिषेवे॥
आचारपूतत्वात्स राजा जगत्पावनस्य पवनस्यापि सेव्य आसीदिति भावः॥१३॥ ॥६७॥

शशामेति॥ गोप्तरि तस्मिन् राज नि वनं गाहमाने प्रविशति॥ वृष्ट्या विनापि दवाग्निर्वना
ग्निः दावदावौ वनानल इत्यमरः॥ शशाम फलानां पुष्पाणां च वृद्धिः॥ विशिष्यत इति विशेषाः॥
अतिशायीति आसि त्कमर्थिकप्रत्ययः॥ सत्वेषु जंतुषु मध्ये यतश्च निर्धारिण इति सप्तमी त्वेषरि
अधिकः प्रबलो व्याघ्रादिः ऊनं दुर्बलं हरिणादिकं न बबाधे॥१४॥ ॥संचारेति॥

॥शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषात्फलपुष्पवृद्धिः॥ ऊनं न सत्वेष्व॥
॥धिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने॥१४॥ संचारपूतानि दिगंतराणि कृ॥
॥त्वा दिनांते निलयाय गंतुं॥ प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः॥१५॥

पल्लवस्य रागो वर्णः पल्लवरागः॥ रागोनुरक्ते मात्सर्ये कुशादौ लोहितादिष्विति शाश्वतः॥
स इव ताम्रा पल्लवरागताम्रा पतंगस्य कांतिः॥ पारदेशार मे शालोपतंगः पक्षिसूर्ययोरि
ति शाश्वतः॥ मुनेर्धेनुश्च दिगंतराणि॥ दिशाअंतराणि॥ अंतरमवकाशो इत्यमरः॥
संचारेण पूतानि शुद्धानि कृत्वा दिनांते ऽस्तकाले निलयायास्तमायाय धेनुपक्षे आल
याय च गंतुं प्रचक्रमे॥ उपक्रम॥१५॥ ७॥

तामिति॥ ॥मध्यमलोकपालः भूपालः देवतापितृतिथिक्रियाः यागश्राद्धदानानि स एवार्थः प्रयोजनं यस्यास्तां धेनुं अन्वक्॥ अन्वगन्वक्षमनुगेनुपदं क्लीबमित्यमरः॥ प योऽस्ततां मतेनसद्भिर्मान्येन॥ गतिबुद्धीत्यादिना वर्तमानक्तः॥ कस्यचवर्तमानइतिषष्ठी॥

॥तां देवतापितृतिथिक्रियार्थामन्वग्ययौमध्यमलोकपालः॥
॥बभौचसातेनसतां मतेन श्रद्धेवसाक्षाद्विधिनोपपन्ना॥१६॥

तेनराज्ञोपपन्नायुक्तासाधेनुः॥ सतां मतेन विधिना अनुष्ठानेनोपपन्नासाक्षात्प्रत्यक्षा श्रध्या आस्तिक्यबुद्धिरिवबभौ॥१६॥

सपल्वलेति॥ सराजापल्वलेभ्यः अल्पजलाशयेभ्यः उत्तीर्णानि निर्गतानि वराहाणां
यूथानि कुलानि येषु तानि॥ बर्हाण्येषां संतीति बर्हिणाः मयूराः॥ मयूरो बर्हिणो बर्हिस
मरः॥ फलवर्हाभ्यामिनच्वक्तव्यः॥ आवासे वृक्षाणां उन्मुखा बर्हिणाः येषु तानि श्यामा
यमानानि अश्यामेन श्यामानि इति श्यामायमानानि लोहितादिराजभ्यः क्यप्रत्ययः॥ वा

॥ सपल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि॥ य
॥ यौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन्॥ १७॥

क्यषो इति आत्मनेपदे शानच्॥ मृगैरध्यासिताः शाद्वला येषु तानि॥ शादाः शष्पाण्येषु
देशेषु संतीति शाद्वलाः॥ शास्य शामादेशः शाद्वलः शादहरिते स जंबाले तु पंकिल इत्यमरः॥
शादः कर्दमशष्पयोरिति विश्वः॥ नडशादाड्ड्वलच् इति वलप्रत्ययः॥ वनानि पश्यन् सन् य
यौ॥ १७॥ ७॥

अपीनइति॥ गृष्टिः सकृत्प्रसूता गौरितिहलायुधः॥ नरेंद्रश्चउभौ यथाक्रमंआपीनमूधः॥ उधस्तुक्लीबमापीनमित्यमरः॥ आपीनभारोद्वहनप्रयत्नानुप्रयासात् वपुषोगुरुत्वादपि आधिक्याच्च अंचिताभ्यांगमनाभ्यां तपोवनादावृत्तेः पंथानं तपोवनावृत्तिपथं॥ ऋक्पूरभूरित्यादिनासमासांतेज्वअलंचक्रतुः॥ भूषितवंतौ॥१८॥ ॥वसिष्ठेति॥ ॥वसिष्टधेनोरनुयायिनमनुचरंवनांतादावर्त्तमानं प्रत्यागतंतं दिलिपं वनितासुदक्षिणा निमेषेणआलसामंदापक्ष्म

॥आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषोनरेंद्रः॥ उभावलंचक्रतुरंचिता॥
॥भ्यांतपोवनावृत्तिपथंगताभ्यां॥१८॥ वसिष्टधेनोरनुयायिनंतमावर्त्तमानं॥
॥वनितावनांतात्॥ पपौनिमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिवलोचनाभ्यां॥१९॥

णांपंक्तिर्यस्याः सा निमेषा सतीत्यर्थः॥ लोचनाभ्यां नेत्राभ्यां उपोषिताभ्यामिव॥ उपवासोभोजननिवृत्तिः तद्वद्भ्यामिव वसतेः कर्त्तरिक्तः॥ पपौ ययोपोषितौ। तितृष्णया जलामधिकं विलोकयतीत्यर्थः॥१९॥

पुरस्कृतेति ॥ वर्त्मनि पार्थिवेन पृथिव्याः ईश्वरेण तस्येश्वर इत्यण्प्रत्ययः ॥ पुरस्कृता अग्रतः कृता धर्मस्य पत्नी धर्मपत्नी धर्मार्थपत्नीसर्थः ॥ अश्वघासादिवत् तादर्थ्ये षष्ठीसमासः ॥ पार्थिवस्य धर्मपत्न्या प्रत्युद्गता सा धेनुः तदंतरे तयोर्दंपत्योर्मध्ये दिनक्षपयोर्दिनरात्र्योर्मध्यगता संध्येव रराज ॥
॥२०॥

॥ पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ॥ तदंतरे सा विरराज ॥
॥ धेनुर्दिनक्षपामध्यगतेव संध्या ॥२०॥ प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा ॥
॥ साक्षतपात्रहस्ता ॥ प्रणम्य चानर्च विशालमस्याः शृंगांतरं द्वारमिवार्थसिद्धेः ॥२१॥

प्रदक्षिणेति ॥ अक्षतानां पात्रेण सह वर्त्तत इति साक्षतपात्रो हस्तो यस्याः सा सुदक्षिणा पयस्विनीं प्रशस्तक्षीरां तां धेनुं प्रदक्षिणीकृत्य प्रणम्य चास्या धेनोर्विशालं शृंगांतरं अर्थसिद्धेः कार्यसिद्धेः द्वारं प्रवेशमार्गमिवानर्च ॥ अर्चयतेर्भौवादिकाल्लिट् ॥२१॥

र॰ द्वि॰ सर्गः

वत्सोत्सुकेति॥ साधेनुः वत्सोत्सुकापि वत्से उत्सुकापि वत्से उत्कंठितापि स्तिमिता निश्चला सती सपर्यां पूजां पर्यग्रहीत्॥ इति हेतोस्तौ दंपती ननंदतुः॥ पूजांगीकारस्य आनंदहेतुत्वमाह॥

भक्त्येति॥ पूज्येषु आनुरागो भक्तिः तत्त्वयोपपन्नेषु युक्तेषु विषये तद्विधानां तस्याः धेन्वाः विधेव विधा येषां तेषां महतामित्यर्थः॥ प्रसादस्य चिन्हानि लग्नानि पूजास्वीकारादीनि पुरः फलानि पुरोगतानि प्रत्यासन्नानि फलानि येषां तानि हि अवलंबिन च कल्गिदर्शनादानोदानंदाय युज्यत इत्यर्थः॥ २२॥

॥ वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ॥ भक्त्योपपन्नेषु हि॥

॥ तद्विधानां प्रसादचिन्हानि पुरःफलानि॥ २२॥ गुरोः सदारस्य निपीड्य पादौ स॥

॥ माप्य सांध्यं च विधिं दिलीपः॥ दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णां॥ २३॥

गुरोरिति॥ भुजोच्छिन्नरिपुर्दिलीपः सदारस्य दारैररुंधत्या सहवर्त्तमानस्य गुरोः उभयोरपीत्यर्थः॥ पादौ निपीड्य॥ अभिवंद्य सांध्यं संध्यायां विहितं विधिमनुष्ठानं च समाप्य दोहावसाने दोहनसमाप्तौ निषण्णां समासीनां दोग्ध्रीं एव दोहनशीलां धेनुमेवानु निति तन्नप्रत्ययः॥ पुनर्भेजे सेवितवान्॥ दोग्ध्रीं मति निरूपपदप्रयोगात् कामधेनुत्वागम्यते॥ २३॥ ८॥

राम

८

तामिति॥ गोप्तारक्षकः गृहणीसहायाः सन्नुभावपित्यर्थः॥ अंतिके समीपे निर्दिष्टे सन्नसन्नि
कृष्ट सनी उपतू॥ सदेशाभ्याशसविधसमर्यादसवेशवत्॥ उपकंठांतिकाभ्यर्णाभ्यग्रा अ
प्यभितोव्ययमित्यमरः॥ न्यस्तानलयः प्रदीपाश्च यस्यास्तां तथोक्तं तां पूर्वोक्तां निषण्णां धेनुं
अन्वास्यानुपविश्य क्रमेण सुप्तामनु अनंतरं संविवेश सुष्वाप॥ प्रातः सुप्तोत्थितां अनुदतिष्ठत्॥
उत्थितवान्॥ अत्रानुशब्देन धेनुराजव्यापारयोः पौर्वापर्यमुच्यते॥ क्रमशब्देन धेनुव्यापारए

॥ तामंतिकन्यस्तबलिप्रदिपामन्वास्य गोप्ता गृहिणीसहायः॥ क्रमेण सुप्तामनुसं॥
॥ विवेश सुप्तोत्थितां प्रातरन्वुदतिष्ठत्॥२४॥ इत्थं व्रतं पालयतः प्रजार्थं समं महिष्या॥
॥ महनीयकीर्त्तेः॥ सप्तव्यतीयुस्त्रिगुणानि तस्य दीनानि दीनोद्धरणोचितस्य॥२५॥

वेत्यर्थः॥ पोनरत्क्यं कर्मप्रवचनीये द्वितीया॥२४॥ इत्थं व्रतमिति॥ इत्थमनेन प्रजार्थं संतानाय
महिष्या समं अभिषिक्तपत्न्या सह कृताभिषेका महिषीत्यमरः॥ व्रतं धारयतः॥ महनीया पूज्या की
र्त्तिर्यस्य दीनानामुद्धरणं दैन्यविमोचनं तत्र उचितस्य परिचितस्य नृपस्य त्रयो गुणाः आवृत्ताः एषां
तानि त्रिरावृत्तानि सप्त एकविंशति दिनानि व्यतीयुः॥२५॥

र॰ द्वि॰ सर्गः

अन्येद्युरिति॥ अन्येद्युरन्यस्मिन् दिने द्वाविंशद्दिने॥ सद्यः परुत्परारित्यादिना निपातनादव्ययं॥ अथ पूर्वेद्युः॥ तृप्ताद्यो पूर्वोत्तरापरात्॥ तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः इत्यमरः॥ मुनिहोमधेनुः आत्मानुचरस्य भावं अभिप्रायं दृढभक्तित्वं भावोभिप्राय आशय इति यादवः॥ जिज्ञासमाना ज्ञातुमिच्छन्तीति ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदं शानच॥ प्रपतत्यस्मिन्निति प्रपातः पतनप्रदेशः॥ गंगायाः प्रपातः तत्तस्यान्ते समीपे निरूढानि जातानि शष्पाणि बालतृणानि यस्मिंस्तत्॥ शष्पं बालतृणं

॥ अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः॥ गंगाप्रपातान्तविरूढ॥
॥ शष्पं गौरीगुरोर्गह्वरमाविवेश॥ २६॥ सा दुःप्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्र॥
॥ हितेक्षणेन॥ अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष॥ २७॥ ५७॥

घासो यवसमित्यमरः॥ गौरीगुरोः पार्वतीपितुः गह्वरं गुहां आविवेश॥ २६॥ ॥ सेति॥ ॥ सा धेनुः हिंस्रैर्घातकैर्व्याघ्रादिभिः मनसापि दुर्धर्षा इति हेतोः अद्रिशोभायां प्रहितेक्षणेन दत्तदृष्टिना नृपेणालक्षितं अभ्युत्पतनं अभिमुख्येनोत्पतनं यस्य सः॥ सिंहस्तां धेनुं प्रसह्य तु हठार्थकः॥ इत्यमरः॥ चकर्ष किलेत्यलीके॥ २७॥

राम

तदीयमिति॥ गुहानिबद्धेन प्रतिध्वनिना दीर्घं तस्या इदं तदीयं आक्रंदितं घोषेण॥ आर्त्तेष्वापन्नेषु साधो हा इति करणस्य नृपस्य नगेंद्रसक्तां दृष्टिं रश्मिषु प्रग्रहेषु॥ किरणः प्रग्रहौ रश्मीत्यमरः॥ आदाय गृहीत्वेव निवर्त्तयामास॥२८॥ स पाट इति॥ धनुर्धरः स नृपः पाटलायां गवि तस्य वासं स्थितं॥ श्वेतरक्तस्तु पाटल इत्यमरः॥ कुसुम्भेति॥ कुसुमप्रत्ययः॥ केसरिणं सिंहं सानुमतो आद्रेः धातो गैरिकस्य विकारो धातुमयी तस्यां अधित्यकायां ऊर्ध्वं भूमौ॥ उपत्यकाद्रेयसन्ना भूमिरूर्ध्वमधि

॥तदीयमाक्रंदितमार्त्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं॥ रश्मिष्विवादाय नगें॥
॥द्रसक्तां निवर्त्तयामास नृपस्य दृष्टिं॥२८॥ स पाटलायां गवि तस्थिवांसं धनुर्धरः॥
॥केसरिणं ददर्श॥ अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं॥२९॥

त्यकेत्यमरः॥ उपाधिभ्यां त्यकंन्नासन्नारूढयोरिति कन्प्रत्ययः॥ प्रफुल्लो विकसितस्तं प्रफुल्लं वि
कसन इति धातोः॥ पचाद्यच्॥ लोध्राख्यद्रुममिव ददर्श॥ प्रफुल्लमिति तकारपाठे त्रिफला दिविश
रण इति धातोः॥ कर्त्तरि क्तः॥ उत्परः स्यात् तत्स्तु कार देशः॥२९॥

र·दि ततेति॥ मृगेंद्रगामी सिंहगामी॥ शरणं रक्षणं। शरणं गृहरक्षणो रित्यमरः॥ शरणे र
क्षणं गृहमित्यपि यादवः॥ शरणे साधुः शरण्यः। तत्रसाधुरितियत्प्रत्ययः॥ प्रसभेण
बलात्कारेण उद्धृतारिर्नृपः राजा जाताभिषंगो जातपराभवः सन्। अभिषंगः पराभव
इत्यमरः॥ वध्यस्य वधार्हस्य दंडादिभ्यो यइतियत्प्रत्ययः। मृगेंद्रस्य वधाय निषंगात्तूणोपा
संगतूणीरनिषंगा इषुधिर्द्वयोरित्यमरः॥ शरमुद्धर्तुमैच्छत्॥२०॥ ॥वामेतरंइति॥

॥ततो मृगेंद्रस्य मृगेंद्रगामी वधाय वध्यस्य शरं शरण्यः॥ जाताभिषंगो नृपति॥
॥निंषंगादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः॥३०॥ वामेतरस्तस्य करप्रहर्तुर्नखप्रभा॥
॥भूषितकंकपत्रे॥ लग्नांगुलिः सायकपुंख एव चित्रार्पितारंभइवावतस्थे॥३१॥

प्रहर्तुस्तस्य वामेतरः दक्षिणकरः नखप्रभाभूषितानि विच्छुरितानि कंकस्य पक्षिविशेष
स्य पत्राणि यस्य तस्मिन्। कंकः पक्षिविशेषस्यात्कुसाकारे॥ युधिष्ठिर इति विश्वः॥ कंक
स्तु कंकट इति यादवः॥ सायकस्य पुंख एव कर्त्तर्यो रव्येमूलप्रदेशे। कर्त्तरि पुंख इति यादवः॥
सक्तांगुलिः सन् चित्रर्पितारंभश्चित्रलिखितशरोद्धरणोद्योग इवावतस्थे॥३१॥

सर्गः

राम
२०

बाहुरिति ॥ बाह्वोः प्रतिष्टंभेन प्रतिबंधेन प्रतिबंधः प्रतिष्टंभ इत्यमरः ॥ प्रवृद्धकोपो राजा मंत्रौषधिभ्यां रुद्धवीर्य यस्य सः ॥ प्रतिप्रतिबद्धवीर्यः प्रतिबद्धशक्तिः भोगीव सर्प इव ॥ भोगी राजसर्पभुजंगपयोरिति विश्वतः ॥ अभ्यर्णं आसन्नं उपकंठांतिकाभ्यर्ण भ्यग्रअप्यभितो व्यपमित्यमरः ॥ अगस्कृतं अपराधकारिणं अस्पृशद्भिः स्वतेजोभिः अंतः अदह्यत ॥ दह्यमानः अधिक्षेपाद्यसहनेन तेजः प्राणात्ययेष्वपि तिष्ठ इत्यमरः ॥३२॥ पदास्तेरि बाह्यापक्षेषु चेतितमिति ॥ निगृहीता पीडिता धेनुर्येन सः सिंहः आर्याणां सतां गृह्यं ऐक्ष्यं ॥

॥ बाहुं प्रतिष्टंभविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः ॥ राजा स्वतेजोभिरदह्यतांत ॥

॥ र्भोगीव मंत्रौषधिरुद्धवीर्यः ॥३२॥ तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुं ॥

॥ विस्मापयन्विस्मितमात्मवृत्तौ सिंहोरुसत्वं निजगाद सिंहः ॥३३॥ ॥७॥

क्यप ॥ मनुवंशस्य केतुं चिन्हं केतुकं व्यावर्त्तकं सिंह इव उरुसत्वो महाबलस्तं आत्मनो वृत्तौ बाहुस्तंभरूपे व्यापारे भूतपूर्वत्वाद्विस्मितं कर्त्तरि क्तः ॥ तं दिलीपं मनुष्यवाचा करणेन पुनर्विस्मापयन् विस्मयं आश्चर्यं प्राप ॥ यद्विगादस्मिङ् ईषद्धसने वइ इति धातो र्णिचि विवृद्धावादेशश्शातृप्रत्यये च सति विस्मापयन्निति रूपं सिध्यं ॥ विस्मापयन्निति पाठे नुगागमार्थं मीत्वं वक्तव्यं ॥ तच्च नित्यस्मयतेरिति हेतुः ॥ उभयपविवक्षायां नेक श्चिद्दोषमेवेति ॥ भास्मोर्भेयइत्यात्मनेपदे विस्मापयन्निति स्यात् ॥ तस्मान्मनुष्यवाचा विस्मापयन्निति रूपसिद्धं ॥ करणविवक्षायां न

अलमिति॥ हे महीपाल तव श्रमेण अलं॥ साध्याभावान्न इत्यर्थः॥ अस्मिन्नपि त्वया श्रमो न कर्त्तव्य इत्यर्थः॥ अ
त्र गमानसाधनक्रियापेक्षया श्रमस्य करणत्वात् तृतीया तदुक्तं॥ उक्तं वनासो प्रोतेन केवलं श्रूयमाणे
व क्रियानिमित्तकरणभावस्यापि तर्हि गम्यमानापीति॥ इतोस्मिन्नपि सार्वविभाक्तेकस्त्वनसि॥ प्रयुक्तम
पि अस्त्रं वृथा स्यात्॥ तथाहि॥ पादपोन्मूलनेशक्तिर्यस्य स तथोक्तं॥ मारुतस्य रंहो वेगः शिलोच्चये पर्वतेन
मूर्छति न प्रसरति॥ ३४॥

॥ अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात्॥ न पादपोन्मूलनश॥
॥ क्ति रंहः शिलोच्चये मूर्छति मारुतस्य॥ ३४॥ कैलासगौरं वृषमारुरुक्षोः पादार्पणानु॥
॥ ग्रहपूतपृष्ठं॥ अवेहि मां किंकरमष्टमूर्तेः कुंभोदरं नाम निकुंभतुल्यं॥ ३५॥ ॥७॥

कैलासेति॥ कैलास इव गौरं शुभ्रं वृषं आरुरुक्षोः॥ आरोढुमिच्छोः चामीकरं च शुभ्रं च गौरमाहुर्मनीषिण इति
शाश्वतः॥ तस्योपरि पदं निक्षिप्य वृषमारुहतीत्यर्थः॥ अष्टौ मूर्तयो यस्य तस्याष्टमूर्तेः शिवस्य पादार्पणं पा
दान्यासस्तदेव अनुग्रहः॥ प्रसादस्तेन पूतपृष्ठं यस्य तं तथोक्तं निकुंभ इव कुंभोदरं नाम किंकरं मां अवेहि॥
विद्धि॥ पृथिवी सलिलं तेजो वायुराकाशमेव च॥ सूर्याचंद्रमसौ यज्वा इत्येता ह्यष्टमूर्तयः॥ ३५॥ ॥७॥

अनुमिति॥ पुरोऽग्रतः अमुं देवदारुं पश्यसीति॥ काकुः असौ देवदारुः वृषभध्वजेयस्य तेन शिवेन पुत्री कृतः पुत्रसंस्कृतः॥ अभूत्॥ तत्तद्गावेत्थिः॥ यो देवदारुः स्कंदस्य मातुः गौर्याः हेम्नः कुंभ एव स्तनः तस्मि न्निसृतानि अंबूनि तेषां रसज्ञः॥ स्वादज्ञः स्कंदपक्षे हेमकुंभ इव स्तन इति विग्रहः॥ पयसां क्षीराणां पयः क्षीरं पयो जले इत्यमरः॥ स्कंदसमानप्रेमास्पदमिति भावः॥ ३६॥ ॥ कंडूयमानेति॥ कदाचित् कंठ

॥ अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोसौ वृषभध्वजेन॥ यो हेमकुंभस्तननिःसृता॥
॥ नां स्कंदस्य मातुः पयसां रसज्ञः॥ ३६॥ कंडूयमानेन कटं कदाचिद्वन्यद्विपेनोन्म॥
॥ थिता त्वगस्य॥ अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः॥ ३७॥

कपोलं कंडूयमानेन वन्यद्विपेन अस्य देवदारोः त्वगस्य उन्मथिता अद्रेस्तनया गौरी असुरा स्त्रैरालीढं क्षतं सेनान्यं॥ पार्वतीनंदनः स्कंदः सेनानीरग्निभूर्गुह इत्यमरः॥ तमिवैनं तथैव शुशोच॥ ३७॥

तदाप्रभृत्येति॥ तदाप्रभृति यस्मिन्कर्मणि यथा तथा॥ वनद्विपानां सार्थं भयार्थं शूलभृता शिवेनांकं
समीपे आगताः सत्वाः प्राणिनो वृत्तिर्यस्य न तु अंकागतसत्ववृत्तिः। अंकः समीप उत्संगे चिन्हे स्था
नापराधयो रितिकेशवः॥ सिंहत्वं विधायास्मिन्नद्रिकुक्षौ गुहायां व्यापारितः॥ नियुक्तः॥ ३८॥

तस्येति॥ परमेश्वरेण प्रदिष्टा निर्दिष्टः कालः भोजनवेलायस्याः सा उपस्थिता प्राप्ता॥ एषा गोरू

॥ तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ॥ व्यापारितः शूलभृता॥
॥ विधाय सिंहत्वमंकागतसत्ववृत्तिः॥ ३८॥ तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदि॥
॥ ष्टकाला परमेश्वरेण॥ उपस्थिता शोणितपारणा मे सुरद्विषश्चांद्रमसी सुधेव॥ ३९॥

पा शोणितपारणा तस्याकागतवृत्तेः॥ मे मम सिंहस्य सुरद्विषराहोश्चंद्रमसः इयं चांद्रमसी सु
धेव तस्य क्षुधितस्य रुधिरव्रतांतभोजनं तृप्त्यै अलं पर्याप्तं॥ नमः स्वस्तीत्यादिना चतुर्थी॥ ३९॥

सत्वमिति ॥ स एव उपायशून्यत्वं लज्जां विहाय निवर्त्तस्व ॥ भवान् त्वं गुरोर्दर्शिता प्रकाशिता शि
ष्यस्य कर्त्तव्या भक्तिर्येन सः ॥ तथोक्तोसि ॥ ननु गुरुधनं विनाश्य कथं तत्समीपे गच्छेयमित्या
ह । शस्त्रेण यद्रक्ष्यं धनं शस्त्रेणायुधेन । शस्त्रमायुधलोहयोरित्यमरः ॥ अशक्या रक्षा यस्य
तदशक्यरक्ष्यं रक्षितुमशक्यमित्यर्थः ॥ तद्रक्ष्यं नष्टमपि शस्त्रभृतां यशो न क्षिणोति ॥ नहि नश्यति ॥
अशक्यार्थेषु प्रतिविधानेन दोषायेति भावः ॥४०॥ ॥इतीति ॥ पुरुषाणामधिराजो नृपः

॥ सत्वं निवर्त्तस्व विहाय लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः ॥ शस्त्रेण रक्ष्यं ॥
॥ यदशक्यरक्ष्यं न तद्यशः शस्त्रभृतां क्षिणोति ॥४०॥ इति प्रगल्भं पुरुषाधि ॥
॥ राजो मृगाधिराजस्य वचो निशम्य ॥ प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यव ॥
॥ ज्ञां शिथिलीचकार ॥४१॥

इति प्रगल्भं मृगाधिराजस्य सिंहस्य वचो निशम्य श्रुत्वा गिरीशेश्वरस्य प्रभावात्प्रत्याहता
स्त्रकुंठितास्त्रः सन् आत्मनि विषये अवज्ञामपमानं शिथिलीचकार । तत्याजेत्यर्थः ॥ अवज्ञातोह
मिति निर्वेदं न प्रापेत्यर्थः ॥ समानेषु हि क्षत्रियाणामभिमानो न सर्वेश्वरं प्राप्नोतीति भावः ॥४१॥

प्रत्यब्रवीति॥ प्रतीति स एव पूर्वः प्रथमः संगः प्रतिबंधो यस्य तस्मिन् तत्पूर्वसंगे इषुप्रयो
गे॥ वितथप्रयत्नः निष्फलप्रयासः अत एव वज्रं कुलिशं मुमुक्षन् मोक्तुमिच्छन् अंबकं लोच
नं दृग् दृष्टिर्नेत्रलोचनचक्षुर्नयनांबकेक्षिणी इति हलायुधः॥ त्रीणि अंबकानि यस्य सः त्र्यं
बको हरस्तस्य वीक्षितेन जडीकृतो निष्पंदीकृतः वज्रो पाणौ यस्य सः वज्रपाणिरिंद्रः प्रहरणा
र्थेभ्यः परे निष्ठासप्तम्यौ भवत इति वक्तव्यमिति पाणौ सप्तम्यंतस्योत्तरनिपातः स एव स्पि

॥प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वसंगे वितथप्रयत्नः॥ जडीकृतस्त्र्यंबकवीक्षि॥
॥तेन वज्रं मुमुक्षन्निव वज्रपाणिः॥४२॥ संरुद्धचेष्टस्य मृगेंद्र कामं हास्यं वचस्त[illegible]॥
॥द्यदहं विवक्षुः॥ अंतर्गतं प्राणभृतां हि वेद सर्वं भवान् भावमतोभिधास्ये॥४३॥

तः नृपः एनं सिंहं प्रत्यब्रवीत्॥ बाहुं सवज्रं शक्रस्य क्रुद्धस्य स्तंभयत्प्रभुरिति महाभारते॥४२॥
संरुद्धेति॥ हे मृगेंद्र संरुद्धचेष्टस्य प्रतिबद्धव्यापारस्य मम तद्वचः वाक्यं कामं हास्यं। हासास्पदं प
रिहसनीयं वचः स त्वं मदीयेनेत्यादिकं अहं विवक्षुः वक्तुमिच्छुरस्मि तर्हि तूष्णीं स्थीयतामित्याशंक्य
ईश्वरकिंकरत्वात्सर्वज्ञं त्वां प्रति न हास्यमित्याह॥ अंतरिति। हि यतः भवान् प्राणभृतां अंतर्गतं हृद्
[illegible]गतं लबहिरप्रकाशितमेव सर्वं भावं वेद वेत्ति। विदो लटो वेति णलादेशः॥ अतोहमभिधास्ये व

राम
१३

क्ष्यामिवचइति। प्रकृतं कर्म संबध्यते। अन्ये तु इदं वचनमाकर्ण्य संभाविताथमेत्तदित्युपहसंति।
अतस्तु मौनमेव भूषणं। खलु वाङ्मनसयोरेक विधिरेवायमिति जानासि। अतोभिधास्यपहृ वोहं
विवक्षुरित्यर्थः ॥४३॥ ॥मान्य इति॥ प्रत्यवहारः प्रलयः स्थावराणां तरुशैलादीनां जंगमो
नां मानुषादीनां सर्गस्थिति प्रत्यवहारहेतुः सर्वेश्वरो मे मान्यः पूज्यः अलंघ्यशासन इत्यर्थः ॥ शास

॥मान्यः स मे स्थावरजंगमानां सर्गस्थितिप्रत्यवहारहेतुः ॥ गुरो॥
॥रपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयं ॥४४॥ ॥७॥

नंच ॥ सिंहत्वमंकागतसत्ववृत्ती त्युक्ते रूपं तद्विविसृज्य। गम्यतां नेत्याह। गुरोरपीति॥
पुरस्ताघनश्यदिदमाहिताग्नेर्गुरोर्धनमपि गोरूपधनं अनपेक्षणीयं। आहिताग्नेरिति
विशेषणेन अनुपेक्षाकारणं हविः साधनत्वं सूचयति ॥४४॥

सत्वमिति॥ सः अंतर्गतसत्त्ववृत्तिस्त्वं मदीयेन देहेन शरीरस्य वृत्तिर्जीवनं निर्वर्त्तयितुं संपाद
यितुं प्रसीदात् दिनावसाने उत्सुकोमाता मम मार्गमिष्यतीति उत्कंठितो बालः वत्सो यस्याः साम
हर्षेरियं धेनुर्विसृज्यतां॥४५॥ ॥अथेति॥ अथ भूतनाथानुगः भूमिपे हासकारणमल्पहेतोर्बहु हातुं

॥सत्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्त्तयितुं प्रसीद॥ दिनावसानोत्सुकबाल॥
॥वत्सा विमुच्यतां धेनुरियं महर्षेः॥४५॥ अथांधकारं गिरिगह्वराणां दंष्ट्रामयू॥
॥खैः शकलानि कुर्वन्॥ भूयः स भूतेश्वरपार्श्ववर्त्ती किंचिद्विहस्यार्थपतिं बभाषे॥४६॥

भूतेश्वरस्य पार्श्ववर्त्ती अनुचरः सिंहः गिरिगह्वराणां गुहानां। देवखातबिलं गुहा [illegible]॥ गह्वर
मित्यमरः॥ अंधकारं ध्वांतं। दंष्ट्रामयूखैः शकलानि खंडानि कुर्वन् निरस्यन्नित्यर्थः॥ किंचिद्वि
हस्य अर्थपतिं॥ नृपं भूयः बभाषे॥ हासकारणं च अल्पस्य हेतोर्बहु हातुमिच्छन्निति वक्ष्यमाणं द्रष्टव्यं॥४६॥

एकेति॥ एकातपत्रं एकछत्रं जगतः प्रभुत्वं स्वामित्वं नवं वयः यौवनं इदं कांतं रम्यं वपुश्चेति॥ एवं ब
हु अल्पस्य हेतोरल्पेन फलेन कारणेन अल्पफलायेत्यर्थः॥ षष्ठी हेतुप्रयोगे इति षष्ठी॥ हातुं त्यक्तु
मिच्छन् विचारे कार्याकार्यविमर्शे मूढः मंदः प्रतिभाति॥४७॥ ॥भूतेति॥ त्वं भूतेषु अनुकंपा
दयारूपा चेत्॥ कृपा दयानुकंपा स्यादित्यमरः॥ कृपैव वर्त्तते चेदित्यर्थः॥ नहि त्वं दनेन तव नाशे सति

॥एकातपत्रं जगतः प्रभुत्वं नवं वयः कांतमिदं वपुश्च॥ अल्पस्य हेतोर्ब
॥हु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वं॥४७॥ भूतानुकंपा तव चेदियं गौ
॥रेका भवेत्स्वस्तिमती त्वदंते॥ जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि॥४८॥

इयमेका गौः स्वस्तिः क्षेमास्यास्तीति स्वस्तिमती नवेज्जीवेदित्यर्थः॥ स्वस्त्याशीः क्षेमपुण्यादा
वित्यमरः॥ हे प्रजानाथ जीवन् पुनः पितेव प्रजाः उपप्लवेभ्यः शश्वेत्सदा॥ पुनः सदार्थयोः श
श्वदित्यमरः॥ पासि रक्षसि॥ स्वप्राणव्ययेन एकधेनुरक्षणात् वरं जीवितमेव शश्वदखिलजगत्त्रा
णमित्यर्थः॥४८॥७७

नधर्मलोपादियंप्रवृत्तिः किंतुगुरुत्वनयादित्यत्राह॥ अथेति॥ अथेतिपक्षांतरे अथवाएकैवधेनुर्यस्य
तस्मादयंकोपाकरणोपन्यासइतिविज्ञेयं॥ अतएवापराधिगवोपेक्षांलक्षणेसतिचंडादतिकोपना
त्। चंडउतस्त्वत्यंतकोपनइत्यमरः॥ अतएवकृशानुःप्रतिमाउपमायस्यतस्मादग्निकल्पाद्गुरोः विभेषी
तिकाकुः॥भीत्रार्थानांभयहेतुरित्यपादानात्पंचमी। अल्पवित्तस्यधनहानिरतिदुःसहेतिभावः॥
अस्यगुरोःमन्युःक्रोधः॥मन्युर्दैन्येक्रतौक्रुधीत्यमरः॥घटाइवऊधांसियासांताःघटोघ्नीः॥उधसन

॥अथैकधेनोरपराधचंडाद्गुरोःकृशानुप्रतिमाद्बिभेषि॥ शक्योस्यमन्युर्भवताविनेतुं॥
॥गाःकोटिशःस्पर्शयताघटोघ्नीः॥४९॥ नद्रक्षकल्याणपरंपराणांभोक्तारमूर्जस्वलमा॥ ॥टं॥
॥त्मदेहं॥महीतलस्पर्शनमात्रभिन्नमृद्धंहिराज्यंपदमैंद्रमाहुः॥५०॥

ऊनदेश॥बहुव्रीहिरुधसोङिप्रत्ययः॥कोटिशोगाःस्पर्शयताप्रतिपादयताविश्राणनंवितरणंस्पर्श
नंप्रतिपादनमित्यमरः॥भवताविनेतुंशक्यः॥४९॥ तदीति॥ तत्तस्मात्कारणात्॥ कल्याणपरंपराणांभो
क्तारं कर्मणिषष्ठी। ओजोबलमस्यास्तीतिओजस्वंजोत्स्नातमिस्रेत्यादीनावलयन्तत्वमांतोनिपातःआ
त्मदेहंरक्ष। ननुगामुपेक्ष्यात्मदेहरक्षणेस्वर्गहानिःस्यादित्यत्राह महीति॥ ऋद्धंसमृद्धंराज्यंमहीतल
स्पर्शनमात्रेणभूतलसंबंधमात्रेणभिन्नमैंद्रंइंद्रसंबंधिपदस्थानमाहुःस्वर्गानभिघ्नतइत्यर्थः॥५०॥ ॥टं॥

एतावदेति॥ मृगेंद्रे एतावदुक्त्वा विरते सति गुहागतेनास्य सिंहस्य प्रतिस्वनेन शिलोच्चयः शैलोपि
प्रीत्या तमेवार्थं क्षितिपाल उच्चैरभाषतेवेत्युत्प्रेक्षा॥ भाषिरयं ब्रुवि समानार्थत्वात् द्विकर्मकः॥ ब्रुवी
त्युद्विकर्मकेषु पठितः॥ तदुक्तं॥ दुहियाचिरुधिप्रच्छिभिक्षिचित्रामुपयोगनिमित्तमपूर्वविधौ॥ ब्रुवि
शासि गुणेन च यत्सचते तदकीर्तितमाचरितं कविनेति॥ ५१॥ निशम्येति॥ देवानुचरस्येश्वरकिं
करस्य सिंहस्य वाचं निशम्य मनुष्यदेवो राजा पुनरप्युवाच॥ किंभूतः सन् तेन सिंहेन यत् अध्यासि

॥ एतावदुक्त्वा विरते मृगेंद्रे प्रतिस्वनेनास्य गुहागतेन॥ शिलोच्चयोपि क्षितिपाल॥
॥ मुच्चैः प्रीत्या तमेवार्थमभाषतेव॥ ५१॥ निशम्य देवानुचरस्य वाचं मनुष्यदेवः॥
॥ पुनरप्युवाच॥ धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः॥ ५२॥

तं व्याक्रमणं नपुंसके भावे क्तः॥ तेन कातरे अक्षिणी यस्यास्तया॥ बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगा
त्पच् षिद्गौरादिभ्यश्चेति ङीप्॥ किं वा वक्ष्यतीति भीत्येव स्थितयेत्यर्थः॥ धेन्वा निरीक्ष्यमाणोऽतएव
व सुतरां दयालुः सन्॥ सुतरामित्यत्र द्विवचनविभज्योपपदे सुशब्दात्तरप्॥ किमेत्तिङव्यये
त्यादिना आम्प्रत्ययः॥ तद्धितश्चासर्वविभक्तिरिति अव्ययसंज्ञा॥ ५२॥ ५९॥

किमुवाचेत्याह॥ क्षतादिति॥ क्षणु हिंसायामिति धातोः संपदादित्वात्क्विप्॥ गमादीनामिति वक्तव्यात्॥
दनुनासिकलोपे तुगागमे च क्षदिति रूपं सिद्धं॥ क्षतो नाशात्त्रायत इति क्षत्रं॥ सुपीति योगविभागा
त्कः॥ तामेतां व्युत्पत्तिं कविरर्थतोनुक्रामति॥ क्षतादित्यादिना॥ उदग्रः उन्नतः क्षत्रस्य क्षत्रवर्णस्य शब्दो वा
चकः क्षत्रशब्द इत्यर्थः॥ एतेन॥ कातपत्रइत्यादिना सोयं क्षतान्नाशात्त्रायत इति व्युत्पत्त्या भुवनेषु रूढः
किल प्रसिद्धः॥ खलु॥ नाश्वकर्णादिवत् केवलं रूढः किंतु पंकजादिवद्योगरूढ इत्यर्थः॥ ततः किमित्यत

॥ क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः॥ राज्येन किं॥
॥ तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा॥ ५३॥ ॥७॥

आह॥ तस्य क्षत्रशब्दस्य विपरीतवृत्तेर्विरुद्धव्यापारस्य क्षतत्राणमकर्तुः॥ पुंसो राज्ये किं न॥
उपक्रोशमलीमसैः निंदामलीनैः॥ उपक्रोशो जुगुप्सा च कुत्सा निंदा च गर्हणे इत्यमरः॥ ज्योत्स्नात
मिस्रेत्यादिना मलीमसशब्दनिपातः तैः प्राणैर्वा किं॥ निंदितस्य सर्वमपार्थमित्यर्थः॥ एतेनैकातपत्र
मित्यादिना श्लोकद्वयेनोक्तं दत्तोत्तरमिति वेदितव्यं॥ ५३॥ ७॥

अथैकधेनोरित्यत्रोत्तरमाह ॥ कथमिति ॥ अनुनयः क्रोधापनयः चकारो चकरार्थः ॥ महर्षेरनुनयो वा अन्या-
सां पयस्विनीनां दोग्ध्रीणां गवां विश्राणनाद्दानात् कथं नु शक्यः ॥ न शक्य इत्यर्थः ॥ अत्र हेतुमाह ॥ इमां गां
सुरभेः कामधेनोः पंचमी विभक्तिरिति पंचमी ॥ अनूनामन्यूनामवेहि ॥ जानीहि । तर्हि कथमस्याः परिभ-
वो भूदित्याह ॥ रुद्रेति ॥ अस्यां गवि त्वया वज्री प्रहृतं आहरस्तु । नपुंसके भावे क्तः ॥ रुद्रौजसा ईश्वरसामर्थ्येन
न तु नवेत्यर्थः ॥ सप्तम्यधिकरणे चेति सप्तमी ॥५४॥

॥ कथं नु शक्योऽनुनयो महर्षेर्विश्राणनादन्यपयस्विनीनां ॥ इमामनूनां सुरभेरवेहि रुद्रौ॥
॥ जसा तु प्रहृतं त्वयास्यां ॥५४॥ सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भव॥
॥ तः ॥ न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ॥५५॥ ॥७॥

तर्हि किं चिकीर्षितमित्यत्राह ॥ सेयमिति ॥ सेयं गौर्मया निष्क्रियते प्रत्याह्रियते अनेन परिगृहीतमिति निष्क्रि-
यः प्रतिशीर्षकणतीति अनूप्रत्ययः । स्वदेहार्पणमेव निष्क्रियस्तेन भवतः त्वत्तः पंचम्यास्तसिल् । मोच-
यितुं न्याय्या न्यायादनपेता युक्तेत्यर्थः ॥ धर्मपत्यर्थेत्वादिना यत्प्रत्ययः ॥ एवं सति तव पारणा भोजनं विहता न
स्यान्मुनेः क्रिया होमादिः सैवार्थः प्रयोजनं स चालुप्तो न भवेत् ॥ स्वप्राणव्ययेनापि स्वामिगुरुधनं संरक्ष्यमिति भावः ॥५५॥

त्र नवानेव प्रमाणमित्याह॥ भवानिति॥ परवान् स्वामिपरतंत्रो भवानपि इदं वक्ष्यमाणमवैति वेत्ति॥ भवतानु
भूयत एवेत्यर्थः॥ शेषप्रथमा इति प्रथमपुरुषः॥ किमित्यत्राह॥ हि यस्माद्धेतोः हि हेतावधारणेत्यमरः॥ तद्वैवदा
रु विषये महान् यत्नः॥ महता यत्नेन रक्ष्यत इत्यर्थः॥ इदमशक्योक्तमर्थं दर्शयति॥ स्थातुमिति॥ रक्ष्यं वस्तु विनाश्य वि
नाशगमयित्वा स्वयमक्षतेनाव्रणेन नियुक्तेनेति शेषः नियोक्तुः स्वामिनो ग्रे स्थातुमशक्यं॥५६॥

॥ भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ॥ स्थातुं नियोक्तुर्न हि शक्यमग्रे विना
॥ श्य रक्ष्यं स्वयमक्षतेन॥५६॥ किमप्यहिंस्यस्तव चेन्मतोहं यशः शरीरे भव मे दयालुः॥ एकां॥
॥५७॥
॥ तविध्वंसिषु मद्विधानां पिंडेष्वनास्था खलु भौतिकेषु॥५७॥

सर्वथा चैतदप्रतिहार्यमित्याह॥ किमिति॥ किमपि किं वाअहं तवाहिंस्यः अवध्यो मतश्चेत् तर्हि मे यशएव श
एव शरीरं तस्मिन् दयालुः॥ स्याद्दयालुः कारुणिकः कृपालुः सुरतः समाइत्यमरः॥ नव॥ ननु मुख्यमुपेक्ष्यामुख्य
शरीरे को भिनिवेश अतआह॥ एकांतेति॥ मद्विधानां मादृशानां विवेकिनां एकांतविध्वंसिषु अवश्यविनाशिषु भौ
तिकेषु पृथिव्यादिभूतविकारेषु पिंडेषु॥ पिंडो वृंदे जपापुष्पे गोले बाले ज सिंहयोः॥ केवल इति हैमः॥ शरीरेषु अवास्था न
पेक्षा॥ आस्थात्वालंबनास्थानयत्नापेक्षासु कथ्यत इति विश्वः॥५७॥

सोहार्दादहमनुस्मरणीयोस्मीत्याह ॥ संबंधमिति ॥ संबंधः सख्यं आभाषणमालापः पूर्वकारणं यस्य तमाहुः ॥ स्यादाभाषणमालापः इत्यमरः ॥ स ताहक्संबंधो वनांते संगतयोर्नौ आवयोर्वृत्तो जातः ततो हे भूतनाथानुग शिवानुचर एतेन तस्य महत्त्वं सूचयति ॥ अत एव संबंधिनो मित्रस्य मे प्रणयं याञ्चां ॥ प्रणयास्त्वमी विश्रंभयाञ्चाप्रेमाण इत्यमरः ॥ विहंतुं नार्हसि ॥५८॥ ॥ तथेति ॥ गां उक्तवते हरये शिवाय । कयोस्ति हे सुवर्णे च वर्णे विष्णौ हरिं विदुरिति शाश्वतः ॥ स घः सत्क्षणे प्रतिष्टंभान्निर्बंधान्निर्मुक्तो बाहुर्यस्य सः स दिलीपः

॥ संबंधमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनांते ॥ तद्भूतनाथानुग नार्हसि त्वं सं॥
॥ बंधिनो मे प्रणयं विहंतुं ॥५८॥ तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टंभविमुक्तबा॥
॥ हुः ॥ सन्न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिंडमिवामिषस्य ॥५९॥ ॥७॥

न्यस्तशस्त्रः त्यक्तायुधः सन् हरये स्वदेहमामिषस्य मांसस्य पललं मामिषमित्यमरः ॥ पिंडं कवलमिव उपानयत् समर्पितवान् ॥ एतेन निर्ममत्वमुक्तं ॥५९॥

तस्मिन्निति॥तस्मिन्क्षणे उग्रं सिंहं निपातं उत्पश्यतः उत्प्रेक्षमाणस्य तर्कयतो अवाङ्मुखस्याधो मुखः॥प्रजानां पालयितुः राज्ञः उपरि परिष्टात्॥उपर्युपरिष्टादिति निपातः॥विद्याधराणां देवयोनिविशेषाणां हस्तैर्मुक्तापुष्पवृष्टिः पपात॥६०॥ ॥उत्तिष्ठेति॥राजा अमृतमिव अमृतायतीत्य

॥तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रं॥अवाङ्मुख॥
॥स्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता॥६०॥उत्तिष्ठवत्सेत्यमृताय॥
॥मानं वचो निशम्योत्थितमुत्थितः सन्॥ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविनीं न सिंहः॥
॥६१॥

मृतायमानं॥उपमानादाचारे इति क्यङ्॥ततः शानच्॥उत्थितमुत्पन्नं॥हे वत्स उत्तिष्ठेति वचो निशम्य श्रुत्वा उत्थितः सन्॥अस्तेः शान्ट्प्रत्ययः॥अग्रतोऽग्रे प्रस्नवः क्षीरस्रवो यस्यास्तां प्रस्रविनीं गां स्वां जननीमिव ददर्श सिंहं न ददर्श॥६१॥

न्त। भति॥ विस्मितस्य मा सर्वगतं कर्त्तरि क्तः॥ तं दिलीपं धेनुरुवाच॥ किमित्यत्राह॥ हे साधो मया
मायां मुद्भाव्य॥ कल्पयित्वा परिक्षितोसि॥ ऋषिप्रभावान्मयि अंतकोपि प्रहर्त्तुं न प्रभुः न समर्थः॥
अन्ये हिंस्रा घातुकाः॥ शरारुर्घातुको हिंस्र इत्यमरः॥ नमिविपि इत्यादिना रप्रत्ययः॥ किमुत सुतु
न प्रभवेद् इति योज्यं। बलवत्सुष्ठु किमुत। स्वत्यतीव भवति निर्भर इत्यमरः॥ ६२॥ भक्त्ति॥ हे पुत्र गु

॥ तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परिक्षितोसि॥ ऋषिप्रभावा॥
॥न्मयि नांतकोपि प्रभुः प्रहर्त्तुं किमुतान्यहिंस्राः॥ ६२॥ भक्त्या गुरौ मय्यनुकंपया॥
॥ च प्रीतास्मि ते वत्स वरं वृणीष्व॥ न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नां ६३

रौ भक्त्या मयि अनुकंपया च ते तुभ्यं प्रीतास्मि॥ क्रियाग्रहणमपि कर्त्तव्यमिति चतुर्थी। वरं देवे
भ्यो वरणीयं अर्थं। देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक् प्रिय इत्यमरः॥ वृणीष्व॥ स्वीकुरुष्व मां के
वलानां पयसां प्रसूतिं कारणं न अवेहि न विद्धि॥ किं तु प्रसन्नां गां कामान् दोग्धीति कामदुघां तामवे
हि॥ दुहः कप् घश्चेति कप्प्रत्ययः॥ ६३॥

भक्त्येति॥ हे पुत्र गुरौ भक्त्या मयि अनुकंपया च ते तुभ्यं प्रीतास्मि॥ क्रियाग्रहणमपि कर्तव्यमिति चतुर्थी॥ वरं देवेभ्यो वरणीयं अर्थं॥ देवाद्वृते वरः श्रेष्ठ त्रिषु क्लीबे मनाक् प्रियइत्यमरः॥ वृणीष्व॥ स्वीकुरुष्व॥ मां केवलानां पयसां प्रसूतिं कारणं न अवेहि॥ न विद्धि॥ किंतु प्रसन्नां नां कामान् दोग्धीति कामदुघां तामेवेहि॥ दुहः कप् घश्चेति क्यप् प्रत्ययः॥६२॥ ॥संतानेति॥ ॥

॥ भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते वत्स वरं वृणीष्व॥ न केवलानां पयसां प्रसूति॥
॥ मवेहि मां कामदुघां प्रसन्नां॥६४॥ ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जित
॥ वीरशब्दः॥ वंशस्य कर्त्तारमनंतकीर्त्तिं सुदक्षिणायां तनयं ययाचे॥६५॥

सा पयस्विनी गोः संतानकामाय तद्इति संतानकामः॥ कर्मण्यण्॥ तस्मै राज्ञे न श्रतिकाम्येति रति कामो वरः॥ कामार्थेष्वत्र प्रत्ययः॥ तं प्रतिश्रुत्य सा प्रतिज्ञाय हे पुत्र मदीयं पयः पत्रपुटे पत्रं निर्मिते॥ पात्रे दुग्ध्वा उपभुंक्ष्व॥ पिबेति उपयुंक्ष्वेति वपाठः॥ न मादिदेश आज्ञापितवती॥६५॥६७॥ ॥६७॥

वत्सस्येति ।। हे मातः वत्सस्य वत्सपीतस्य शेषं वत्सपीतावशिष्टमित्यर्थः ।। होम एव अर्थस्तस्य विधिरनुष्ठा
नं तस्य शेष होमावशिष्टमित्यर्थः ।। तव ऊधसि भवं औधस्यं क्षीरं शरीरावयवाच्चेति यत्प्रत्ययः ।। रक्षिता
या उर्व्याः षष्ठांश षष्ठभागमिव ऋषेरनुज्ञामधिगम्य उप भोक्तुमिच्छामि ।। ६६ ।। ।। इच्छामिति ।। ।।

।। वत्सस्य होमार्थविधेश्च शेषं गुरोरनुज्ञामधिगम्य मातः ।। औधस्यमिच्छामि तव ।।
।। वोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ।। ६६ ।। इत्थं क्षितीशेन वशिष्ठधेनुर्विज्ञापिता प्री ।।
।। ततराबभूव ।। तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममाश्रमेण ।। ६७ ।। ।।

इत्थं क्षितीशेन विज्ञापिता वशिष्ठस्य धेनुः प्रीततरा पूर्वं शुश्रूषया प्रीता । संप्रश्नेन या विज्ञापन
या प्रीततरा अति संतुष्टा बभूव ।। तदन्विता तेन दिलीपेनान्विता हैमवतात् हिमवत्संबंधिनः कुक्षेः
गुहायाः सकाशात् ।। आश्रमेण अनायासेन आश्रमं प्रत्याययौ आगता ।। ६७ ।। ।। ६७ ।।

तस्या इति ॥ प्रसन्नेंदुरिव मुखं यस्य सः नृपाणां गुरुर्दिलीपः प्रहर्षचिन्हैर्मुखरागादिभिरनुमितमनूदितं तस्याः धेनोः प्रसादमनुग्रहं प्रहर्षचिन्हैरेव ज्ञातत्वात् पुनरुक्तयेव वाचा गुरवे निवेद्य विज्ञाप्य पश्चात् प्रियायै शशंस ॥ कथितस्यैव कथनं पुनरुक्तिः । न चेह तदस्ति । किंतु चिन्हैः कथितप्रायत्वात्तु उत्प्रेक्षा ॥ ६८ ॥ ॥ स इति ॥ अनिंदितात्मा अगर्हितस्वभावः सत्सु वत्सलः प्रेमवान् सद्वत्सलः । वत्सां सा भ्यां कामबलेति न चल्व प्रत्ययः ॥ वशिष्ठेन कृताभ्यनुज्ञः कृतानुमतिः सन् वत्सस्य हुतस्य चावशेषं पीतहुतावशिष्टं नंदिन्याः स्तन्यं क्षीरं शुभ्रं मूर्तं परिच्छिन्नं यश इव अतितृष्णः सन् नृपः पपौ ॥ ६९ ॥

॥ तस्याः प्रसन्नेंदुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य ॥ प्रहर्षचिन्हानुमितं ॥
॥ प्रियायै शशंस वाचा पुनरुक्त एव ॥ ६८ ॥ स नंदिनीस्तन्यमनिंदितात्मा स ॥
॥ द्वत्सलो वत्सहुतावशेषं ॥ पपौ वशिष्टेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ॥ ६९ ॥

राम
२०

प्रातरिति। वशी वशिष्ठः प्रातर्यथोक्तस्य पूर्वोक्तस्य व्रतस्य गोसेवारूपस्य पारणान्ते प्रस्थानि
कं प्रस्थाने भवं तत्कालोचितमित्यर्थः॥ कालाट्ठञिति ठञ्प्रत्ययः॥ यथा कथं चिद्गुणवृत्त्या कालेवर्त्तमा
नत्वात्॥ प्रत्यय विधानमिति कारः॥ ईयते प्राप्यते नेनेत्ययनं॥ स्वस्त्ययनं शुभावहमाशीर्वचनं प्रयु
ज्य तौ दंपती स्वां राजधानीं पुरीं प्रति प्रस्थापयामास॥७०॥ प्रदक्षिणीति॥ नृपो हुतं तर्पितं अग्निं तिष्ठ

॥प्रातर्यथोक्तं व्रतपारणान्ते प्रस्थानिकं स्वस्त्ययनं प्रयुज्य॥ तौ दंपती स्वां प्रतिराज
॥धानीं प्रस्थापयामास वशी वशिष्ठः॥७०॥ प्रदक्षिणीकृत्य हुतं हुताशनं अनंतरं स्वभर्तुः॥
॥ तारमरुंधतीं च॥ धेनुं सवत्सां च नृपः प्रतस्थे सन्मंगलोदग्रतरप्रभावः॥७१॥

ताशनः अग्निः कर्मण्यम्॥ तं भर्तुर्मुनेरनंतरं भर्तुः प्रदक्षिणानंतरमित्यर्थः॥ अरुंधतीं च सवत्सां धेनुं
च प्रदक्षिणीकृत्य प्रगतादक्षिणं तिष्ठद्गुप्रभृतीति निपातादव्ययीभावः ततः च्विः अप्रदक्षिणं प्रदक्षिणं संपद्यमा
नं कृत्य सद्भिर्मंगलैः प्रदक्षिणादिभिर्मंगलाचारैरुदग्रतरः प्रभावः स नृपः प्रतस्थे॥७१॥

श्रोत्रेति ॥ धर्मपत्नीरहितः सहिष्णुः व्रतादिदुःखसहनशीलः स नृपः श्रोत्राभिरामध्वनिना मार्गमनु द्रुतः पाषाणादिप्रहितथा नरहितः ॥ अतएव सुखम् ॥ तीति सुखस्तेन रथेन स्वेन पूर्णेन सकलेन मनोरथेने ययौ ॥ मनोरथपक्षे ध्वनिः स्तुति अनुयातः प्रवं निवृत्तिः ॥७२॥ तमिति ॥ अदर्शनेन प्रवासनिमित्तेना हितो स्तुत्यं जनितदर्शनोत्कंठं प्रजार्थेन व्रतेन नियमेन कर्शितं कृशीकृतमंगं यस्य तं न वोदयमेवाभ्यु

॥ श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः ॥ ययावनुद्धातसुखेन ॥
॥ मार्गं स्वेनेव पूर्णेन मनोरथेन ॥७२॥ तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रत ॥
॥ कर्शितांगं ॥ नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनां ॥७३॥ ॥७॥

दयं प्रजास्तृप्तिमवाप्नुवद्भिरतिगृध्नुभिर्नेत्रैरौषधीनां नाथं सोमम् इव पपुः ॥ अत्यास्थया ददृशुरित्यर्थः ॥ नवं

द्रपक्षे दर्शनेकलाक्षयनिमित्तेन प्रजार्थं लोकसहितार्थं व्रतं देवताभ्यः कलादाननियमः ॥ तं च सोमं पपु
र्देवाः पर्यायेणानुपूर्व्यं राइतिव्यासः ॥ उदय आविर्भावोन्यत्समानं ॥७३॥ ॥७॥

पुरंदरेति॥ पुरंदरसुराणां दारयतीति पुरंदरः। पूः सर्वयोर्दारिसहोरिति खच्प्रत्ययः॥ वाचंयमपु
रंदरौ चेति मुमागमनिपातः॥ तस्य[illegible]रिव श्रीर्यस्य सः नृपः पौरैरभिनंद्यमानः उत्पताकं उच्छ्रितध्व
जं पताका वैजयंती स्यात्केतनं ध्वजमस्त्रियामित्यमरः॥ पुरं प्रविश्य भुजंगेंद्रेण समानसारे तुल्यबले
सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिष्वित्यमरः॥ भुजे भूमेर्धुरमाससंज अर्पितवान्॥७४॥७॥

॥पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनंद्यमानः॥ भुजे भुजंगेंद्र॥

॥समानसारे भुयः स भूमेर्धुरमाससंज॥७४॥

अथेति॥ अथ द्यौः सुरालयो द्यौः स्वर्गसुखवर्त्मनोरिति विश्वः॥ अत्रेर्महर्षेर्नयनात्समुत्थाज्ज्योत्पत्तिर्यस्य तत्॥
अतश्चोयमिति सर्ग इति कप्रत्ययः॥ नेत्रोद्भूतमुक्तं॥ हरिवंशे॥ नेत्राभ्यां परिस्रुतं दशधा द्योतयन् दिशः॥
तं गर्भं दशधा हृष्टा दिशो देव्यो दधुस्ततः॥ चद्रस्यापि त्रियामासु न चैनास्तामशन्कुर्वन्॥ स ताभ्यः सहसैवाप
दिग्भ्यो गर्भः प्रभावितः॥२॥ पपात भावयन् लोकान्॥ शीतांशुः सुरभावन इति सुरैरिंद्रगावन्हिना निष्ठ्युतं वि
क्षिप्तं॥ लो॥ स्नुउत्तू नासिके क्षेत्रे चेत्यनेन निपूर्वाष्ठीवनेर्वकारस्य ऊठ्॥ नुन्न नुन्नास्तनिष्ठ्यूत विद्धक्षिप्तेरिता

र॰ वं॰ २२

समाइत्यमरः॥ ऐशं तेजः स्कंदमिव॥ अत्र रामायणे ते यत्वा पर्वतं राम केवलं धातुमं इति॥ अग्निं संयोजयामास। पुत्रार्थं सर्वदेवताः देवकार्यमिदं देवसमाधत्स्व हुताशन॥ शैलपुत्र्यां महत्तेजो गंगायां तेजउत्सृजत्॥ देवतास्तं प्रतिज्ञाय गंगामभ्येत्य पावकः॥ गर्भं धारय वै देवी देवतानामिदं प्रियं॥ ततस्तो वचनं श्रुत्वा दिव्यं रूपमधारयत्। तस्य महिमानं दृष्ट्वा समंताद्व्यकीर्यत॥ ४॥ समंततस्तदा देवीं समभ्येत्य च पावकः॥ सर्वश्रोतांसि पूर्णानि रागायारघुनंदनेति॥ ५॥ राज्ञि सुदक्षिणा नरपतेर्दिलीपस्य कुलसंततिलक्षणायै गुरुभिः

॥ अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशं॥ नरप॥
॥ तिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः॥ ७५॥ ॥ इति॥
॥ श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ नंदिनीवरप्रदानो नाम द्वितीयः सर्गः॥ २॥ ॥

महद्भिर्लोकपालानामनुभावैस्तेजोभिरभिनिविष्टमनुप्रविष्टं गर्भमाधत्त दधावित्यर्थः॥ अत्र मनुः॥ अष्टानां लोकपालानां वपुर्धारयते नृप इति॥ अत्राधत्तेत्यनेन स्वीकर्तृधारणमुच्यते॥ तथा च मंत्रे च दृश्यते॥ यथेयं पृथिवी मुह्यत्तानागर्भमादधे॥ एवं तं गर्भमाधेहि दशमे मासि सूतवे इत्याश्वलायनानां सीमंतमंत्रे स्त्री व्यापारधारणे शब्दप्रयोगदर्शनादिति॥ मालिनी वृत्तमेतत्॥ तदुक्तं॥ ननमयययुतेयं मालिनी भोगिलोकैरिति॥ ॥ इति श्रीपदवाक्यप्रमाणपारावारीणमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां संजीविनीसमाख्यायां द्वितीयः सर्गः॥ २॥ ॥ संवत १९०४ आषाढ शुद्ध ८ भानुवासरे इदं लिखितं पुस्तकं समाप्तं॥ ॥ ॥

राम २२

॥ श्रीगणेशाय नमः ॥ उपाधिगम्योप्यनुपाधिगम्यः समानलोकोप्यसमानलोकः ॥ भवोपि योभूत्तभवः शिवोयं जगत्यपायादपि नः सपायात् ॥ १ ॥ राज्ञीगर्भमाधत्तेत्युक्तं संप्रति गर्भलक्षणानि प्रस्तौति । अथेति । अथ गर्भधारणानंतरं सुदक्षिणा उपस्थितोदयं प्राप्तकालं भर्तरीप्सितमनोरथं भावेक्तः पुनः सखीजनस्योद्वीक्षणानां दृष्टीनां कौमुदीसुखं चंद्रिकाप्रादुर्भावं यद्वा कौमुदी वरत्सवतीव । तदुक्तं भविष्योत्तरे । कौमोदंते अनायस्मात्तेनासौ कौमुदी मतेति । तस्याः सुखं प्रारंभमत एव केचित् कौमुदीसहमिति पाठं पठंति । इक्ष्वाकुकुलस्य

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीसुखं ॥ निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दोहदलक्षणं दधौ ॥ १ ॥ ॥

संततेरविछेदस्य निदानं मूलकारणं । निदानं त्वादिकारणमित्यमरः ॥ एवं दोहदलक्षणं गर्भचिन्हं वक्ष्यमाणं दधौ स्वहृदयेन गर्भहृदयेन च विहृदायया गर्भिण्याः चेष्टं प्रधातिमानमिति तत्संबंधित्वं गर्भोद्वाहो दोहदमित्युच्यते सा तद्योगाद्दोहदनीति तदुक्तं । संग्रहे द्विहृदयां नारीं दोहदनीति आचक्षते तरस्यत्र दोहलक्षणस्येति तत्वेन कौमुदीसुखत्वेन च रूपकालंकारः ॥ अस्मिन् सर्गे वंशस्थवृत्तं ॥ जातौ तु वंशस्थमुदीरितं जरौ ॥ १ ॥ ५७ ॥ ५७ ॥

र-सर्ग- संप्रति मारव्यगर्भलक्षणं वर्णनीयं । शरीरेति ॥ शरीरसादात्कार्श्यादसमग्रभूषणा
१ परिमितभूषणा लोध्रपुष्पवत्पांडुना मुखेन लक्षिता सुदक्षिणा विचेयाः मृग्याः तारका
यस्याः सा तथोक्ता विरलनक्षत्रेत्यर्थः ॥ तनुप्रकाशेनाल्पकांतिना शशिना उपल
क्षिता ईषदपरिसमाप्तं प्रभातं प्रभातकल्पा प्रभातकल्प कतसूचयेति प्रभातशब्दस्य पुंव
द्भावः । शर्वरीव अलक्ष्यत । शरीरसादादिगर्भलक्षणैः । धाहिष्ठः । क्षाम ता गरिमा कुक्षोम
र्द्या छर्दिररोचकं ॥ जभा प्रसेकोचदनेरोमराज्याः प्रकाशनमिति ॥ २ ॥ तदिति । क्षितीश्व
शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपांडुना ॥ तनुप्रकाशेन विचेय
तारका विभातकल्पा शशिनेव शर्वरी ॥ २ ॥ तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपा
घ्राय न तृप्तिमाययौ ॥ करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलं ॥ ३ ॥
रो रहसि एकांते मृत्सुरभि मृदा सुगंधितस्याः आननं उपाघ्राय तृप्तिं नाययौ ॥ कमिव शुचि
व्यपाये ग्रीष्मावसाने शुचिः शुद्धे नुपहते शृंगाराषाढयोरपि । ग्रीष्मे हुतवहेपि स्यादुपधाशु
द्धमंत्रिणीति विश्वः पयोमुचां मेघानां पृषतैः बिंदुभिः सिक्तं मुक्षितं वनराजिपल्वलं वेशंतं ।
वेशंतं पल्वलं चाल्पमित्यमरः । उपघ्राय करिव गजेरिव राजिपल्वलनाकालनामिनी । मुखस्पर्शा
भि वनुसंधेयः । गर्भिणी नाम मृद्भक्षणं लोके प्रसिद्धमेवाए तेन दोहदाख्यमुच्यते ॥ ३ ॥ ॥

दोहदलक्षणे मृद्भक्षणे हेतुत्वेन तरमुत्प्रेक्षते। दिवमिति। हि यस्मात्कारणात् तद्दिगांतविश्रांतरथ
श्च रूपतीति स्याः सुतः तत्सुतः मरुत्वानिंद्रः। इंद्रो मरुत्वान् मघवान् बिडौजाः पाकशासन इत्य
मरः। इव स्वर्गमिव भुवं भोक्ष्यते भुजो नवन इत्यात्मनेपदं। अतः प्रथमं सा सुदक्षिणा भूविका
रमृद्रूपे अभिलष्यत इति अभिलाषो भोग्यवस्तु तस्मिन् कर्मार्थे अप्रत्ययः। इस्यंते स्वाद्यंते
इति रसाः भोग्यार्थाः अन्ये च ते रसाश्च तान् विहाय मनो बबंध निदधावित्यर्थः। दोहदहेतुकस्य मृ
द्भक्षणस्य पुत्रभूतगर्भसूचनार्थत्वमुत्प्रेक्ष्यते।।४।। नेति। मगधस्य अपत्यं स्त्री मागधी सुदक्षि

दिवं मरुत्वानिव भोक्ष्यते महीं दिगंतविश्रांतरथो हि तत्सुतः।। अतोभिलाषे प्रथमं तथा
विधे मनो बबंधान्यरसान् विलंघ्य सा।।४।। न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तु
षु केषु मागधी।। इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोसलेश्वरः।।५।।

णा। घञ्। मगधकलिंगसूरमसात् दण्। स्त्रियां ङीप्। ह्रिया किंचित्किमपि ईप्सितं इष्टं मे मह्यं न शंस
ति नाचेष्टे। केषु वस्तुषु स्पृहावतीत्यनुवेलं अनुक्षणमादृत आदरवान्। कर्तरि क्तः। आदृतो
सादरा चित्ताविस्मरः प्रियायाः सखीः सहचरीः उत्तरकोसलेश्वरो दिलीपः। पृच्छति स्म पप्रच्छ
।। लट् स्मे इति भूतार्थे लट्। सखीनां विश्रंभाभिलाषादिति भावः।।५।। ।।

२-सर्ग- उपल्येति। दोहदगर्भिणीमनोरथः। दोहलं दोहदं श्रद्धा लालसं च समं स्मृतमिति हलायुधः॥ सा
२ दक्षिणा दोहदेन दुःखशीलनां दुःखस्वभावतां उपेत्य प्राप्य यस्कं यत् वस्त्र आचकांक्षेत स्पृहतमानी
तं भद्रे इति शेषः। तद्वस्तु अपश्यद्दुपलब्ध तत्र चेत्यर्थः। कुतः हि यस्मात्कारणात् अस्य भूपतेः ईदृशं
यस्कं त्रिदिवे पि स्वर्गे पि अनासाद्यं अप्राप्यं नाभूत् किं याश्ययानेत्याह। अधिज्यधन्वन इति नाहि
वीरपत्नीनामालभ्यं किंचिदस्तीति भावः। अत्राह्वः। यादृशो ध्येविवाहां तेश्रद्धां च विविधा स्मकेयाति
अनेन पत्नीमनोरथापूरणमुक्तं रणे देशादोषप्रसंगात्। तत्तु राज्ञः स्त्रीलोल्याता तदुक्तं दैयमप्याहि
उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतं॥ न हीष्टमस्य त्रिदिवे पि भूपतेरभूद
नासाद्यमधिज्यधन्वनः॥६॥ क्रमेण निस्तीर्य च दोहदव्यथां प्रचीयमानावयवा रराज सा॥ पुरा
णपत्रापगमादनंतरं लतेव संनद्धमनोज्ञपल्लवा॥७॥ दिनेषु गच्छत्सु नितांतपीवरं तदीयमा
नीलमुखं स्तनद्वयं॥ तिरश्चकार भ्रमराभिलीनयोः सुजातयोः पंकजकोशयोः श्रियं॥८॥ ॥
तंतत्स्येहितारहितमसकं॥ श्रद्धा विघातकर्तस्य चिंक्ततिक्षतिरेव च। अन्यच्च दोहदस्याप्रदानेन
गर्भो दोषमवाप्नुयादिति॥६॥ क्रमेणेति। सा सुदक्षिणा क्रमेण दोहदव्यथां निस्तीर्य प्रचीयमा
नावयवा पुष्यमाणावयवा सती पुराणपत्राणां अपगमादनंतरं संनद्धाः संजाताः प्रत्यग्रताम
नोज्ञाः पल्लवा यस्याः सा लतेव रराज॥७॥ लक्ष्मणं तरं वर्णयति। दिनेष्विति। दिनेषु दोहदादिनेषु
गच्छत्सु सत्सु नितांतं पीवरं अतिगुरु आसमंतात् नीले मुखे चुचुके यस्य तदीयं स्तनद्वयं भ्रमरैर्वली
नयोः आसयोः सुजातयोः सुन्दरयोः पंकजकोशयोः पद्ममुकुलयोः श्रियं तिरश्चकार अ

धानेति। नृपः ससत्वामापन्नसत्वां गर्भिणीमित्यर्थः। महिषीं निधानं गर्भे यस्यास्तां साग
रांबरां समुद्रवसनामित्यर्थः। तामियश्रंतरेग्नः पावको यस्यास्तां शमीभिधां शमीत
रौ वन्हीरत्यत्र लिंगं शमीगर्भादग्निं मंथति। अतः सलिलां सरस्वतीं नदीमिवामन्यत। ए
तेन गर्भस्य भाग्यवत्वतेजस्वित्वपवित्रत्वानि विवक्षितानि॥९॥ प्रियेति। धीरः सः स्वा
नः प्रियानुरागस्य मनः समुन्नतेः औदार्यस्य भुजेन भुजबलेनार्जितानां नूतुचा॥ज्या

निधानगर्भामिव सागरांबरां शमीमिवाभ्यंतरलीनपावकां॥ नदीमिवांतःसलि
लां सरस्वतीं नृपः ससत्वां महिषीममन्यत॥९॥ प्रियानुरागस्य मनःसमुन्नतेर्भु
जार्जितानां च दिगंतसंपदां॥ यथाक्रमं पुंसवनादिकाः क्रियाः धृतेश्च धीरः सदृशीर्व्यध
त्त सः॥१०॥

॥

दिनां दिगंतेषु संपदां च धृतेः अतः पुत्रो मे भविष्यतीति संतोषस्य धृतिर्योगांतरे धैर्यधा
रणाध्वरतुष्टिषु इति विश्वः। सदृशीरनुरूपाः पुमान् सूयते अनेनेति पुंसवनं तदादियाःसाताः
क्रियाः यथाक्रमं क्रममनतिक्रम्य व्यधत्त कृतवान्। आदिशब्देनानवलोभनसीमंतोन्नयने

र॰सर्ग॰ गृह्येइति अर्थमासि द्वितीये वा पुंसवनं यदहः। पुंसा नक्षत्रेण चंद्रमसा युक्तः स्यादिति परा
३ शरः। चतुर्थे नवलोभनमित्याश्वलायनः। षष्ठेऽष्टमे वा सीमंतोन्नयनमिति याज्ञवल्क्यः॥१०
॥सुरेंद्रेति। गृहागतो नृपः सुरेंद्राणां लोकपालानां मात्राभिरंशैराश्रितस्यानुप्रविष्ट
स्य गर्भस्य गौरवाद्भारात्। प्रयत्नेन मुक्तासनया आसनादुत्थितयेत्यर्थः। उपचारांजलि

सुरेंद्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया गृहागतः॥ तयोपचारांजलिखि
न्नहस्तया ननंद पारिप्लवनेत्रया नृपः॥११॥ कुमारभृत्याकुशलैरनुष्ठिते भि
षग्भिराप्तैरथ गर्भवेश्मनि॥ पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवम
भ्रितामिव॥१२॥

वंजलिकरणखिन्नहस्तया पारिप्लवनेत्रया तरलाक्ष्या तया सुदक्षिणया च। चंचलं तरलं चैव
पारिप्लवपरिप्लवे इत्यमरः। ननंद॥ सुरेंद्रमात्राश्रितेत्यत्र मनुः॥ अष्टाभिश्च सुरेंद्राणां मा
त्राभिर्निर्मितो नृप इति॥ कुमारेति॥ अथ कुमारभृत्या बालचिकित्सा॥ संज्ञायां समज ३
निषेत्यादिना क्यप्॥ तस्यां कुशलैराप्तैर्हितैर्भिषग्भिर्वैद्यैः गर्भस्य मर्माणि भरपोषणे॥

नमर्हेमभ्रातिरितिशाश्वतः ॥ भजोमनिच्प्रत्ययः अनुष्ठितेनकृतेसतिकालेदशमे
मासि । अन्यत्रग्रीष्मावसाने । प्रसवस्यगर्भमोचनस्योन्मुखी ॥ आसन्नप्रसवामित्यर्थः ।
स्यादुत्पादेफलेपुष्पेप्रसवेगर्भमोचनेइत्यमरः ॥ प्रियांअभ्याणिसंजानियस्याः अभि
तानदस्यसंजानमितिच ॥ दिवमिवपतिः प्रतीतः सन् । ख्यातेहृष्टेप्रतीतःस्यादित्य
मरः । ददर्श ॥ १२ ॥ ग्रहैरिति । ततः शच्याइंद्राण्यासमा । पुलोमजाशचींद्राणीत्यमरः । सा

ग्रहैस्ततः पंचभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदं ॥ असूत सूनुं स
मयेशचीसमात्रिसाधनाशक्तिरिवार्थमक्षयं ॥ १३ ॥ ॥ ॥

सुदक्षिणासमयेप्रसूतेकालेसतिदशमेमासीत्यर्थः । दशमेमासिप्रजायतइतिश्रु
तेः । उच्चसंस्थितैस्तुंगस्थानगैर्वसूर्यगैरनस्तमितैः कैश्चित्तु यथासंभवंपंचभिर्ग्रहैः
सूचिताभाग्यसंपद्यस्यतंपुत्रंत्रीणिप्रभावमंत्रोत्साहात्मिकानिसाधनान्युत्पादकाय
गधनाशक्तिः शक्तयस्तिस्रः ॥ प्रभावोत्साहमंत्रजाइत्यमरः । अक्षयमर्थमिवासूत ।
॥ षूङ्प्राणिगर्भविमोचनइत्यादिषुपठ्यते तस्माद्धातोःकर्तरिलङ् । अत्रेदमनुसंधेयं

र॰ सर्ग॰ ४

।अजवृषभमृगांगनाकुलीरासषवणिज्योच्चदिवाकरादितुंगाः।दशशिखिमनुयुक्तिथीं
द्रियांशौस्त्रिनवकविंशतिभिश्चतेस्तनीचाः।इतिसूर्यादीनांसप्तानांग्रहानांमेषवृषभा
दिराशयोंश्लोकोक्तक्रमविशिष्टाः।उच्चस्थानानीतिस्वेस्वेतुपगक्षयास्तमस्थानानिना
नाचानितत्रोच्चेषपिदशमादयोराशित्रिंशामयथाक्रममुच्चेषुपरमोच्चानीचेषुपरमनी
चाइतिजातश्लोकार्थः।अत्रांशास्त्रिंशोभागः।यथाहनारदः।त्रिंशांशाभागात्मकंलग्नमि

दिशःप्रसेदुर्मरुतोववुःसुखाःप्रदक्षिणार्चिर्हुतमग्निराददे।बभूवसर्वंशुभशंसि

तत्क्षणेभवोहिलोकाभ्युदयायतादृशां॥१४॥ ॥ ॥

ति।सूर्यप्रत्यासत्तिर्ग्रहाणामस्तमयोनाम।तदुक्तंलघुमानसे।रवितमयोयोगोवियोग
स्तदयोभवेत्इति।तेचस्वोच्चस्थाफलंति।नास्तगाः।तदुक्तंराजमृगांके।स्वोच्चेःपूर्णंस्वर्क्ष
मूर्ध्वेसुपादंविचाल्यंशुभेवैरंध्रं।नीचास्योपीनास्तगोचानाकेचित्यादन्यूनंत्रिकोणेदद्याती
ति।तदिदमाहकविः।उच्चसंस्थितेरसूर्यगैरितिच।एकद्वित्रिचतुर्भिर्जायतेसतियस्यज
न्मकालेपंचप्रभृतयोग्रहाःस्वोच्चस्थाःसदेवतुल्योभवति।तदुक्तंकूलस्थौपोखुखिनःप्र
गण्यकार्यराजप्रतिरूपकाश्चराजनरःएकद्वित्रिचतुर्भिर्जायतेतत्परंदिव्याइति।तदिद

४

माहुः पंचभिरिति ॥१३॥ दिश इति ॥ तत्क्षणं तस्मिन्क्षणे अत्यंतसंयोगे द्वितीया ॥ दिशः प्र
सेदुः प्रसन्नाः बभूवुः मरुतो वाताः सुखाः मनोहाराः ववुः वांतिस्म अग्निः प्रदक्षिणार्चिः
तत्‌ हविरादेदे स्वीचकार इत्थं सर्वं शुभशंसि शुभसूचकं बभूव ॥ तथाहि ॥ तादृशां रघुप्र
काराणां भवो लोकाभ्युदयाय भवतीति शेषः अतो देवा अपि संतुष्टा इत्यर्थः ॥१४॥ अरि
ष्टेति ॥ अरिष्टं सूतिकागृहमित्यमरः ॥ अरिष्टशय्यां परितः सर्वतः अभितः परितः समया
निकषा हा प्रतियोगे पि दृश्यत इति द्वितीया ॥ विसारिणा सुजन्मनस्तस्य शिशोर्निजनैः स
अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा ॥ निशीथदीपाः सहसा
हतत्विषो बभूवुरालेख्यसमर्पिता इव ॥१५॥ ॥ ॥
र्गिकेण तेजसा सहसा हतत्विषो निशीथे दीपाः अर्धरात्रनिशीथौ द्वावित्यमरः ॥ आले
ख्ये चित्रे समर्पिता इवाबभुः ॥ निशीथशब्दो दीपानां प्रभाधिक्यसंभावनार्थः ॥१५॥ जना
येति ॥ भूपतेरमृतसंमितामृतात्क्षरं अमृतसमानाक्षरं सरूपं समशमितमित्यमरः ॥ यहृदंडी ॥
जन्म पुत्रोत्सत्तिं शंसते कथयते शुद्धांतचराय अंतःपुरचारिणे जनाय त्रयमेवादेयमा
सीत् ॥ किं तत्‌ ॥ शशिप्रभं छत्रमुभे चामरे च छत्रादीनां राज्ञः प्रधानांगत्वादिति भावः ॥

र.सर्ग. ५

१६॥ निवातेति। निवातो निर्वातप्रदेशः। निवातावाश्रयावातावित्यमरः॥ तत्रयत्पद्मं तद्वत्स्तिमितेन निष्पंदेन चक्षुषा कांतंसुतानंन्वपिबतः॥ तत्स्नयापश्यतो नृपस्यगुरुरुत्कटःप्रहर्षःकर्त्तारंइंदुदर्शनात्॥ गुरुर्महोदधेःपरंजलौघनइवात्मनिशरीरेन प्रबभूव। आत्मनंनियंतुंनशशाकं॥ अत्रनेमाविस्मेतियावत्॥ नह्यत्याधरैरधिकं

अनाथसुधांतचरायशासतेकुमारजन्मामृतसंमितताक्षरं॥ अदेयमासीत्त्रय मेवभूपतेःशशिप्रभंछत्रमुभेचचामरे॥१६॥ निवातपद्मस्तिमितेनचक्षुषा नृपस्यकांतंपिबतःसुताननं महोदधेःपुरइवेंदुदर्शनात्गुरुःप्रहर्षःप्रबभूव नात्मनि॥१७॥ ॥

मोयत्तदस्तिभावः॥ यद्वाहर्षआत्मनिस्वस्मिन्विषयेनबभूव। आत्मानंनियंतुंनशशाक किंतुबहिर्निर्जिगामेत्यर्थः॥१७॥ ॥ ५

उ

॥ स दिलीपसूनुः तपस्विना पुरोधसा वसिष्ठेन तपस्वित्वात्तदनुष्ठितं कर्म सवी
र्यस्यादिति भावः । तपोवनादेत्य आगत्य अखिले जातकर्मणि जातस्य कर्तव्ये संस्का
रविशेषे कृते सति प्रयुक्तः संस्कारः शाणोल्लेखनादिर्यस्य स तथोक्तः आकरोद्भवः
खनिः स्त्रियामाकरः स्यादित्यमरः । मणिरिवाधिकं बभौ ॥ वसिष्ठमंत्रप्रभावात्ते

सजातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते ॥ दिलीपसूनु
र्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ॥ १८ ॥ सुखश्रवा जं मंगलतू
र्यनिःस्वना प्रमोदनृत्यैः सह वारयोषितां ॥ न केवलं पद्मनि मागधीपतेः पथि
व्यजृंभंत दिवौकसामपि ॥ १९ ॥ ॥

त्विषो भूदित्यर्थः ॥ अत्र मनुः । प्राग्नाभिवर्धनात्पुंसां जातकर्म विधीयत इति ॥ १८ ॥ सुखे
ति । सुखश्रवणं येषां ते सुखश्रवाः श्रुतिसुखा इत्यर्थः ॥ मंगलतूर्यनिःस्वनाः मंगलवाद्य
ध्वनयः वारयोषितां वेश्यानां ॥ वारस्त्री गणिका वेश्या इत्यमरः ॥ प्रमोदनृत्यैः सह मागधीपते
र्दिलीपस्य सद्मनि केवलं गृह एव न व्यजृंभंत किंतु द्यौरोको येषां ते दिवौकसः ॥ पृषोदरादित्वा
त्साधुः तेषां मार्गे आकाशेपि व्यजृंभंत तस्य देवांशत्वाद्देवोपकारित्वाच्च देवदुंदुभयो नेदुरित्यर्थः ॥ १९ ॥

र.सर्ग. ६ नेति। रक्षितुः सम्यक्क्षमाने लेशीलस्य। तन्नरातित्तन तस्यात्तए वचोराद्यभावात्सं
यतो बधोनष्टभूय नास्तिस्म। नाभूत्किं तेनात्तश्चा हावीति सुअन्मनो हर्षः संतो
षितः सन्नसंबधं विसर्जयेत्त॥ किंतु सा राजा तदा पित्तणाभिधानात्त। बंधनात्के
वलंमेकं यथत्तथा स्वयमेव स्वयमेक एवेत्यर्थः॥ केवलः कृत्स्नएकश्च केवलांश्चा

न संयतस्तस्य बभूव रक्षितुर्विमोचयेद्यं सुतजन्महर्षितः॥ ऋणा
भिधानात्स्वयमेव केवलं तदा पित्तणां मुमुचे सबंधनात्॥२०॥ ॥

बधारणे इति शाश्वतः॥ मुमुचे। कर्तरि लिट्। स्वयमेव चास्मिन्नर्थे एष वोन्नृणो यः
पुत्रीति श्रुतेः॥ प्रमाणं॥२०॥ ॥

...ति । अथ वित् शब्दार्थज्ञः पार्थिवः अयमर्भकः । श्रुतस्य शास्त्रस्यांतं पारं या
यात् तथा युधि संग्रामे परेषां शत्रूणां अंतं पारं यायात् यांतु शक्नुयादित्यर्थः शाके
लेकं चेति शक्यार्थे लिङ् । इति हेतोर्धातोः । अगि रगि लघि गत्यर्थः इति रघि धा

श्रुतस्य यायादयमंतमर्भकस्तथा परेषां युधि चेति पार्थिवः ॥ अवे
क्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवं ॥ २१ ॥ ॥

तोर्गमनाख्यमर्थं विदित्वा आवेक्ष्य आलोच्य आत्मसंभवं पुत्रं नाम्ना रघुं चकार । लघि
पं घोर्नलोपश्चेत्युक प्रत्यये पालाम् लघुं च लंगुलीनां पालो रलमापद्यत इति वैक
ल्पिके रेफादेशो रघुरिति सिद्धं ॥ अत्र शंख्यः । अशौचे तु व्यतीते नाम कर्म विधीयत इति ॥
॥ २१ ॥

र॰ सर्ग॰ ७

पितुरिति। सः रघुः समग्रः संपत्तः पितुः प्रयत्नात्। शुभैर्मनोहरैः शारीरावयवैः हरि
दश्वदीधितेः। सूर्यस्य रश्मेः अनुप्रवेशात् बालचंद्रमा इव दिने दिने। प्रतिदिनं नित्यवीप्स
योरिति द्विवचनं। वृद्धिं पुपोष। अत्र संहितायाचचनं सलिलमया शशानि रवेर्दीधितयो
मूर्छितास्तमो नैशं क्षयंति। दर्पणोदरानिहिताभ्यगंदिरस्यां तरस्तति।।२२।। उमावृषां

पितुः प्रयत्नात्स समग्रसंपत् शुभैः शरीरावयवैर्दिने दिने। पुपोष वृद्धिं हरिद
श्वदीधितेरनुप्रवेशादिव बालचंद्रमाः।।२२।। उमावृषांकौ शरजन्मना यथा यथा जयं
तेन शचीपुरंदरौ। तथा नृपः सा च सुतेन मागधी ननंदतुस्तत्सदृशेन तत्समौ।।२३।।

कौ पार्वतीवृषध्वजौ शरजन्मना कुमारेण। कुमतिकियो महासेनः शरजन्मा षडानन इत्य
मरः। यथा ननंदतुः शचीपुरंदरौ जयंताख्येन सुतेन। जयंतः पाकशासनिरित्यमरः। यथा
ननंदतुः। तत्समौ ताभ्यामुमावृषांकाभ्यां शचीपुरंदराभ्यां च सो मौ स मागधी नृपश्च
तत्सदृशेन ताभ्यां कुमारजयंताभ्यां सदृशेन सुतेन ननंदतुः। मागधी ख्याता।।२३।।

७

रथांगं ति। रथांगनाम्नी च रथांगनामा च रथांगनामानौ चक्रवाकौ। पुमान्स्त्रिये
त्येकशेषः। तयोरिव तयोर्दंपत्योर्भावबंधनं हृदयाकर्षणं। परस्पराश्रयं अन्योन्य
विषयं यत्प्रेम बभूव। तदेकेन केवलेन तान्यामन्येन वा एके। मुख्यान्यकेवलाः इत्य
मरः। एकोन्यार्थे प्रधाने च प्रथमे केवले तथा। साधारणे समानेऽल्पे संख्यायां च प्र

रथांगनाम्नोरिव भावबंधनं बभूव यत्प्रेम परस्पराश्रयं॥ विभक्तमप्ये
कसुतेन तत्तयोः परस्परस्योपरिनव्यहीयत॥२४॥ ॥ ॥

युज्यत इति विश्वः॥ सुतेन विभक्तमपि कृतविभागमपि परस्परो स्परस्योपरिनव्य
हीयत वृद्धा कर्मकर्तरि लिङ्। अकृत्रिमत्वात्स्वयमेवोपचितमित्यर्थः। यदेकाधारं वस्तु
तदाधारये विभज्यमानं हीयते च अनयोः भागे के विषये प्रेमसंक्रांतिः द्वितीयो विषयाला
७। भेपि नाहीयत प्रत्युतोपचितमेवाभूदिति भावः॥२५॥ ॥ ५

उवाचेति। सोर्भकः शिशुः। पोतः पाकोर्भकोऽर्भः पृथुकः शावकः शिशुरित्यमरः। धात्र्या उपमातृ। धात्री जनन्याम लकीवसुमत्युपमातृषु इति विश्वः। प्रथममुदितानि उपदिष्टानि वचांसि उवाच यत्। तदीयामंगुलिमवलंब्य ययौ यत्। प्रणिपातस्य शिक्षया उपदेशेन नम्रोऽभूदिति यत् तेन पितुर्मुदं ततान ॥२५॥ तमिति। शारीरयोगजैः

उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलंब्य चांगुलिं। अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोर्भकः ॥२५॥ तमांकमारोप्य शारीरयोगजैः सुखैर्निषिंचंतमिवामृतं त्वचि। उपांतसंमीलितलोचनो नृपश्चिरात्सुतस्पर्शरसज्ञतां ययौ ॥२६॥ ॥ ॥

सुखैः त्वचि त्वगिंद्रिये अमृतं निषिंचंतमिव तं पुत्रं अंकं आरोप्य मुदा चिभावात् उपांतयोः संमिलितलोचनः सन् नृपः चिरात् सुतस्पर्शरसज्ञतां ययौ रसः स्वादुः ॥२६॥ ८

अमंस्तेति। स्थितेरभेत्ता मर्यादापालकः। स नृपः परार्ध्यजन्मना उत्कृष्टजन्मना अनेन रघुणा अन्वयं वंशं प्रजानां पतिः ब्रह्मा गुणाः सत्वादयः। गुणाः सत्वं रजस्तमा इत्यमरः। तेषु अग्रेण मुख्येन सत्वेन वर्त्तते व्याप्रीयत इति। गुणाग्र्यवर्त्तितेन स्वस्य मूर्त्तिभेदेन अवतारविशेषेण विष्णुना आत्मनः सर्गसृष्टिमिव स्थितिमंतं प्रतिष्ठावंतं अमंस्त मन्यतेरनुदा

अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिमंतमन्वयं॥ स्वमूर्त्ति
भेदेन गुणाग्र्यवर्त्तिना पतिः प्रजानामिति सर्गमात्मनः॥२७॥ ॥

त्वादिप्रतिषेधः। अत्रोपमानोपमेययोरितेतरविशेषणानीतरत्रप्रयोज्यानि तत्र रघुपक्षे विद्याविनयादयः। गुणे प्रधाने रूपादौ मौर्व्यां सुदे रकोदरे। स्तंभे सत्वादिसंध्यादि विद्यादि हरितादिष्वेति विश्वः। शेषं सुगमं॥२७॥

२.सर्ग. ९

सेति। चूडाकार्या द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्तव्या श्रुतिचोद
नात्॥ इति मनुस्मरणात्। तृतीये वृत्तचूडः। निष्पन्नचूडाकर्मा सन्। डलयोरभेदः। रघुः
प्राप्ते तु पंचमे वर्षे विद्यारंभं च कारयेदिति वचनात्। पंचमे वर्षे चकौलेकपक्षकैश्चल
शिखंडकैः। बालानां तु शिखा प्रोक्ता काकपक्षशिखंडकाः इति हलायुधः। सवयोभिः।

सवृत्तचौलश्चलकाकपक्षकैरमात्यपुत्रैःसवयोभिरन्वितः॥ लिपेर्य
३ थावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत्॥२८॥

स्निग्धे वयस्यः। स्निग्धः सवया इत्यमरः। अमात्यपुत्रैरन्वितः सन् लिपेः पंचाशद्वर्णात्मि
कायाः मातृकाया यथावद्ग्रहणेन सम्यग्बोधनोपायभूतेन वाङ्मयं शब्दजातं। नद्यामु
खं तु वदने मुख्याद्यारंभद्वारास्युपाययोरिति यादवः। तेन कश्चिन्मकरादिः समुद्रमिवावि
शत्तस्य तत्त्वज्ञानवानित्यर्थः॥२८॥ ९

अथात।गर्भाष्टमे प्रकुर्वीत ब्राह्मणस्योपयनं। गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विश
इति मनुस्मरणात्।अथ गर्भैकादशाब्दे विधिवदुपनीतं कृतोपनीतं गुरुप्रियमेनं रघुं
विपश्चितो विद्वांसो गुरवो विनिन्युः शिक्षितवंतः। ते गुरवो अस्मिन् रघौ अवंध्ययत्नाश्च

अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियं। अवंध्य
यत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति॥२९॥ ॥

बभूवुः। तथाहि। क्रिया शिक्षा। क्रिया तु निष्कृतौ शिक्षाचिकित्सोपायकर्मसु इति यादवः। वस्तुनि पात्रभूते उपहिता प्रयुक्ता प्रसीदति। क्रिया हि फलं जनयतीत्यर्थः। द्रव्य
मिति कौसिल्यः॥२९॥ ॥

र॰स॰त॰ धियमिति। अत्र कामंदकः। शुश्रूषाग्रहणंचैवश्रवणंधारणंतथा। ग्रहणेहार्थविज्ञानं
१०
तत्वज्ञानंचधीगुणाः इति। आन्वीक्षिकीत्रयीवार्त्तादंडनीतिश्चशाश्वती॥ विद्याह्येताश्च
तस्रश्चलोकसंस्थितिहेतवे। आन्वीक्षिक्यांतुविज्ञानंधर्माधर्मौत्रयीस्थितौ। अर्थान
र्थौतुवार्त्तायांदंडनीत्यांनयानयौ। उदारधीः कृत्स्नस्त्रबुद्धिः सः रघुः समग्रैर्धियोगुणैः

धियः समग्रैः सगुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः॥ ततार
विद्याः पवनातिपातिभिर्दिशोहरिद्भिर्हरितामिवेश्वरः॥३०॥ ॥

चशुश्रूषादिभिः। चत्वारोर्णवाउपमानंयासांताश्चतुरर्णवोपमाः। तद्धितार्थेउत्तरप
दसमासः। चतस्रोविद्याः हरितांदिशामीश्वरः। सूर्यः पवनातिपतिनिर्हरिद्भिनि
जाश्वैः। हरित्ककुभिवर्णेचतृणवाजिविशेषयोरितिविश्वः। चतस्रोदिशइवक्रमात्
२०
ततारचतुरर्णवोपमत्वंदिशामितिद्रष्टव्यं॥३०॥ ॥ ॥

त्वचामीति। कार्षचरौरववास्तानि चर्माणि ब्रह्मचारिणः। वसारन्नानुपूर्व्येण शाणक्षौ
मादिकानि चेति मनुस्मरणात्॥ मध्यांशुधां रौरवीं रुरुसंबंधिनी। ककर्महाकृष्ण
सारइत्यादयः॥ त्वचं चर्म परिधाय वसिता मंत्रवित् समंत्रकमस्त्रं। आग्नेयादि
कं पितुरेवाध्यायदशिक्षत। अभ्यस्तवान्। आख्यातोपयोगइत्यापादाने पंचमी॥

त्वचं च समेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मंत्रवित्॥ न केव
लं तद्गुरुरेकपार्थिवः क्षितावभूदेकधनुर्धरोपि सः॥३१॥ ॥

पितुरेवेत्यवधारणमुपपादयति। तद्गुरुरेको द्वितीयः। पार्थिवः केवलं पृथिवी
श्वरएव नाभूत्। किंतु क्षितौ स दिलीपएकधनुर्धरोप्यभूत्॥३१॥ ॥ ॥

महोक्षतामिति। रघुः क्रमाद्यौवनेभिन्नशैशवो निरस्तशिशुभावः सन् महानुक्षा
महोक्षो महर्षभः। अचतुरेत्यादिना सूत्रेण निपातनाददकारान्तत्वं तस्य भावस्तत्ता
तां स्पृशन् गच्छन्। वत्सतरो दम्य इव दन्यवत्सतरौ समावित्यमरः। द्विपेंद्रभावं जगत्त्वं प्र
यन् व्रजन् कलभः करिणो इव गांभीर्येन चापलेन मनोहरं वपुः पोपोष ॥३१॥ अथ

महोक्षतां वत्सतरः स्पृशन्निव द्विपेंद्रभावं कलभः श्रयन्निव। रघुः क्रमाद्यौवन
भिन्नशैशवः पुपोष गांभीर्यमनोहरं वपुः ॥३२॥ अथास्य गोदानविधेनंतरं विवा
हदीक्षां निरवर्तयद्गुरुः। नरेंद्रकन्यास्तमवाप्य सत्पतिं तमोपहं दक्षसुता इव भुः ॥३३॥

ति। गोर्नादित्ये चोलीचेदेक्रतुभेदर्षिभेदयोः स्त्रियामस्यां दिशि भारत्यां भूमौ च सुरभावपि
। पुंस्त्रियोभ्यस्य यस्त्वां पुराशिदरबाणलोमस्विति केशवः। गावो लोमादिकेशादीयं खंडं
गतेस्मिन्नरतिच्युतस्य गोदानं नाम ब्राह्मणादीनां षोडशादिषु वर्षेषु कर्त्तव्ये केशीनारव्यं
कर्मोच्यते। तदुक्तं मनुना। केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते। राजन्यबंधोर्द्वाविंशे वै
श्यस्य द्व्यधिके ततः इति। अथ गुरुः पिता। गुरुर्गीष्पतिपित्राद्याविल्यमरः। अस्य विधेर्गोदानवि
धेरनंतरं विवाहदीक्षां निरवर्तयत् कृतवान्। अथ नरेंद्रकन्यास्तं रघुं दक्षस्य सुता रोहिण्याद
यो दं चंद्रमिव। तमोघ्नं चंद्रं करतीति विभ्यः। सत्पतिमिवावाप्य आयभुः। रघुरपि तमोनुत।

संप्रतियौवराज्येयोग्यतामाह।युवेति।युगानाम धुर्यस्कंधगतस्तच्छिद्रप्रांतोयानां
गभूतोदारुविशेषः।यानाद्यंगेयुगः पुंसियुगंयुग्मेकृतादिषित्यमरः।युगवत्व्या
यतौदीर्घौबाहूयस्यसः।अंसाचयस्त्वंसबलोवानमांसश्चेतिवृत्तिकारः।बल
वान्।मांसलोंसलइत्यमरः।वत्सांसाभ्यांकामबलेइतिवत्तचप्रत्ययः।कपाट

युवायुगव्यायतबाहुरंसलः कपाटवक्षाःपरिणद्धकंधरः।।वपुःप्रक
र्षादजयत्गुरुंरघुस्तथापिनीचैर्विनयाददृशात।।३४।। ।। ।।

वक्षाः अररीराः।कपाटमररंतुल्येइत्यमरः।परिणद्धकं।वधरोविशालग्रीवा।अ
थग्रीवायांशिरोधिकंधरेत्यपीत्यमरः।।परिणाहोविशालतेत्यमरः।रघुःवपुःप्र
कर्षादधिक्यात्यौवनकृतात्गुरुंपितरमजयत्।तथापिविनयान्नम्रत्वेननीचै
रत्यकोदृशात।अनौधत्यंचविवक्षितं।।३४।। ।। ।।

र॰स॰त॰ ततः। आत्मना स्वयं चिरं धृत्तां नितांतगुर्वी। बोत्तोगुरुणवचनादिति ङीष्। प्रजा
१२ नां धुरं पालनप्रयासं लघयिष्यता लघुकरिष्यता। तदाचष्ट इति लघुशब्दाण्णिच्।
ततो लृटः। सदेति शतृप्रत्ययः। नृपेण दिलीपेनासो रघुः निसर्गेण स्वभावेन संस्का
रेण शास्त्राभ्यासजनितवासनया चाद्विनीतो नम्रः इति हेतोर्युवराज इति शब्दभा

ततः प्रजानां चिरमात्मना धृतां नितांतगुर्वी लघयिष्यता धुरं॥ निसर्ग
संस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक्॥ ३५॥ ॥ ॥

जतीति तथोक्तः। भजो ण्विरिति ण्विप्रत्ययः। चक्रे कृतः। द्विविधो हि नयः। स्वभावि
कः। विनयो पगहानन्त्यैः कुर्वन्नि नृपतिः सन्। अविनीतकुमारं हि कुलमाशु वि
शीर्यते। विनीतमौरसं योदराज्ये भिषेचपेदिति॥ ३५॥ ॥ ॥ १२

नरेंद्र इति । गुणान् विनयादीन् सौरभ्यादींश्च अभिलषतीति गुणाभिलाषिणी
श्री राज्यलक्ष्मीः पद्माश्च याच नरेंद्र दिलीप एव मूलायतनं प्रधानस्थानं तस्य पा
द्वानादनंतरं सन्निहितं युवराजसंज्ञितं ज्ञात्तस्य संजाता यस्य सः युवराजसंज्ञि
तं । तारकादित्वात् इतच् प्रत्ययः । आत्मनः पदं स्थानं । आस्पदं प्रतिष्ठायां निपातितः । स

नरेंद्रमूलायतनादनंतरं तदास्पदं श्रीर्युवराजसंज्ञितं । अगच्छदंशे
न गुणाभिलाषिणी नवावतारं कमलादिवोत्पलं ॥३६॥ ॥ ॥

रघुरित्यास्पदं कमलाश्रीरित्यन्नं नवावतारं अचिरोत्पन्नमुत्पलमिव अंशे
नागगच्छत् । स्त्रियो निराज्यंतीति भावः ॥३६॥ ॥ ॥

विभुवसुरिति। सारथिना सहायभूतेन एतद्विशेषणद्वयमुत्तरवाक्येप्यनुषजनी
यं।। तेन वायुना विभावसुर्वह्निरर्कः।। सूर्यवह्नी विभावसू इत्यमरः। घनव्यपाये
न सारथिना गभस्तिमान् सूर्य इव।। कटो गंडः।। गंडः कटो मदो दानमित्यमरः।।

विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव।। बभू
व तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः।।३७।। ।।

तस्य प्रभेदः स्फुटनं भेदादय इत्यर्थः।। तेन करीव पार्थिवो दिलीपः तेन रघु
णा आतितरामित्यं तं सुसदुःसहः सुष्ठु असह्यश्च बभूव।।३७।। ।।

नियुज्येति शतक्रतुर्विंद्रः उपमा उपमानं यस्य स शतक्रतूपमः स दिलीपः श
तं वैतस्या राज्ञपुत्रौ देवा आशापाला इत्यादिश्रुत्या राजसुतैरनुद्रुतमनुगतं
धनुर्धरं रघुं होमतुरंगाणां रक्षणे नियुज्य एकेन क्रतुना अपूर्णमेकोनं क्रतु
नियुज्यतं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतं ॥ अपूर्णमेकेन शतक्र
तूपनः शतक्रतूनामपविघ्नमापसः ॥३८॥ ततः परं तेन मखाय यज्वनातुरं
गमुत्सृष्टमनर्गलं पुनः ॥ धनुर्भृतामग्रत एव रक्षतां जहार शक्रः किल गूढवि
ग्रहः ॥३९॥ ॥ नामश्वमेधानां नशतं अपविघ्नमपगतविघ्नं यथा तथा आप ॥३८॥
ततः इति ततः परमेकोनशतक्रतुप्राप्त्यनंतरं यज्वना विधिनेष्टवता तेन दिलीपेन पु
नरपि मखाय मखं कर्तुं क्रियार्थेत्यादिना चतुर्थी । उत्सृष्टमुक्तमनर्गलमप्रतिब
धं अव्याहतं स्वैरगातिमित्यर्थः । अपर्यावर्तयंतो मरयमनुचरतीत्यापस्तंबस्मरणा
त् । तुरंगं धनुर्भृतां रक्षिणां अग्रत एव शक्रो गूढविग्रहः सन् जहार किलेत्यैतिह्ये ॥३९॥ ॥

स॰स॰ल॰ विषादेति।तत्कुमारसैन्यंसपदिविषादइष्टनाशात्कृतोमनोभगः।तदुक्तंवि
२४ षादश्चेतसोभंगउपायाभावनाशयोरिति।तेनलुप्ताप्रतिपत्तिः।कर्तव्याज्ञानंयस्य
तत्तथोक्तं।विस्मितमश्वनाशस्याकस्मिकत्वादाश्चर्यान्वितं।संस्थितंतस्थौ।

विषादलुप्तप्रतिपत्तिविस्मितंकमारसैन्यंसपदिस्थितंचतत्।वसि
ष्ठधेनुश्चयदृच्छयागताश्रुतप्रभावाददृशेथनंदिनी॥४०॥

अथतत्प्रभावायदृच्छयास्वेच्छायाआगतानंदिनीनामवसिष्ठधेनुश्चददृशे। २४
स्वप्रसादलघुत्वादनुजिघृक्षेतिभावः।द्वौचकारावविलंबसूचकौ॥४०॥ ॥

तदिति। स तां पुरस्कृतः पूजितो दिलीपनंदनो रघुः पुण्येन तस्यानंदिन्यायदंगत
स्य निष्यंदोद्रवः स एव जलं मूत्रमित्यर्थः। तेन लोचने प्रमृज्य शोधयित्वा अतींद्रि
येषु इंद्रियाण्यतिक्रांतेषु। अत्यादयः क्रांताद्यर्थे द्वितीयेति समासः। द्विगुप्राप्तापन्ना
लंपूर्वगतिसमासेष्वपरवल्लिंगं तत्प्रतिषेधाद्विशेष्यनिघ्नत्वं भावेषु वस्तुषु उपप
तदंगनिष्यंदजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सता। अतींद्रियेष्वप्युप
पन्नदर्शनो बभूव भावेषु दिलीपनंदनः॥४१॥ स पूर्वतः पर्वतपक्षशातनं ददर्श
देवं नरदेवसंभवः। पुनः पुनः सूतनिषिद्धचापलं हरंतमश्वं रथरश्मिसंयतं॥४२॥
न्नदर्शनः। स पन्नसाक्षात्कृतिर्बभूवेत्यर्थः॥४१॥ स इति। नरदेवसंभवः सः रघुः पुनः पुनः सु
तेन सारथिना निषिद्धचापलं निवारितोद्धत्यं रयस्य रश्मिभिः प्रग्रहैः। किरणप्रग्र
हौ रश्मी इत्यमरः। संयतं बद्धमश्वं हरंतं पर्वतपक्षाणां शातनं छेदकं देवमिंद्रं पूर्वतः
पूर्वस्यां दिशि ददर्श॥४२॥ ॥ ॥

र॰स॰त॰
९५

शतैरिति। रघुस्तमश्वहर्तारं अनिमिषवृत्तिभिर्निमेषव्यापारभूत्यैरक्ष्णां शतैः हरि
भिर्हरिद्वर्णैः। हरिं वाच्यं वदाख्यातो हरित्कपिलवर्णयोरिति विश्वः। वाजिभिरश्वैश्च
हरिभिंद्रं विदित्वा। हरिर्वार्कचंद्रेंद्रयमोपेंद्रमरीचिषिति विश्वः। एनमिंद्रं गगनस्पृशा
व्योमव्यापिना धीरेण गंभीरेण स्वरेण ध्वनिनैव निवर्त्तयन्निवोवाच॥४३॥ शतै

स्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः। अवोचदेनं गग
नस्पृशा रघुः स्वरेण धीरेण निवर्त्तयन्निव॥४३॥ मखांशभाजां प्रथमो मनीषि
भिस्त्वमेव देवेंद्र यतो निगद्यसे। अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाता
य कथं प्रवर्तसे॥४४॥ ॥ ॥

मखेति। हे देवेंद्र मनीषिभिस्त्वमेव मखांशभाजां प्रथमः। सदा निगद्यसे कथ्यसे तथा
पि अजस्रदीक्षायां प्रयतस्य मद्गुरोः क्रियाविघाताय क्रतु विधाय क्रियायां विहंतु
मित्यर्थः। तुमर्थाच्च भाववचनादिति चतुर्थी। कथं प्रवर्त्तसे॥४४॥ ॥

९५

त्रिलोकीति। त्रयाणां लोकानां नाथस्त्रिलोकनाथः। तद्धितार्थेत्यादिना उत्तरपद
समासः। तेन त्रैलोक्ये नियामकेन दिव्यचक्षुषा। अतींद्रियार्थदर्शिना त्वया मखद्वि
षः क्रतुविघातकाः। सदा नियम्याः ननु शिक्ष्याः खलु सत्त्वधर्मचारिणस्त्वं तां कर्म
सु क्रतुषु स्वयमंतराये विघ्नो भवसि चेत् विधिरनुष्ठानं च्युतः लोकस्तत्कर्म कथं वस्य

त्रिलोकनाथेन सता मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा। स चेत्कथं कर्म
सु धर्मचारिणां त्वमंतरायो भवसि च्युतो विधिः॥४५॥ तदंगमग्र्यं मघवन्महा
क्रतोरमुं तुरंगं प्रतिमोक्तुमर्हसि। पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाद
देन पद्धतिं॥४६॥ ॥

मित्यादित्यर्थः॥४५॥ तदिति। हे मघवन् तस्मात्कारणात् महाक्रतोरश्वमेधस्य अग्र्यं
श्रेष्ठमंगं साधनममुं तुरंगं प्रतिमोक्तुं प्रतिदातुमर्हसि। तथा हि। श्रुतेः। पथो दर्शयि
तारः सन्मार्गदर्शका ईश्वरा महांतः मलीमसां मलिनां पद्धतिं मार्गं नाददते न स्वीकुर्व
ते असन्मार्गं नावलंबत इत्यर्थः। मलीमसं तु मलिनं कच्चरं मलयिषितमित्यमरः॥४६॥

र.स.त.
९६

इतीति। इति रघुणा समीरितं प्रगल्भं वचो निशम्याकर्ण्य दिवौकसः। दिवस्वर्गे गतरि
क्षेचेति विश्वः। तेषां अधिपतिर्देवेंद्रो रघुप्रभावात्सविस्मयः सन् रथं निवर्तया
मास। उत्तरं प्रतिवक्तुं प्रचक्रमे च॥४७॥ यदात्थेति। हे राजन्यकुमार क्षत्रियकुमार मू
र्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराडित्यमरः। यद्वाक्यमात्थ अब्रवीः। दाषु

इति प्रगल्भं रघुणा समीरितं वचो निशम्याधिपतिर्दिवौकसां॥ निवर्तयामा
स रथं सविस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरं॥४७॥ यदात्थ राजन्यकुमार तत्त
था यशस्तु रक्ष्यं परतो यशोधनैः॥ जगत्प्रकाशं तदशेषमिज्यया भवद्गुरुर्लंघ
यितुं ममोद्यतः॥४८॥

वः पंचानामित्यादिना आह सोद्देशः। तथा सत्यं किंतु यशोधनैरस्मादृशैः परतः शत्रु
तो यशो रक्ष्यं। ततः किमिति तत्राह। भवद्गुरुस्त्वत्पिता जगत्प्रकाशं लोकप्रसिद्धं
अशेषं सर्वं मम तद्यशः इज्यया योजेन लंघयितुं उद्यतः उद्युक्तः॥४८॥ ॥

९६

किंतद्यशाइत्याह।हरिरिति।पुरुषोत्तमइतिसत्यमीसमासः।।ननिर्धारणइति
षष्ठीसमासनिषेधात्कर्मधारयेतुसन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैरित्यु
त्तमपुरुषइतिस्यात्।यथाहरिर्विष्णुरेकएवपुरुषोत्तमः स्मृतः।त्र्यंबकः शिव
एवमहेश्वरः।स्मृतोनापरः।अपरःपुमान्नतथामांमुनयःशास्त्रकृतुविदुः।विरो

हरिर्यथैकःपुरुषोत्तमस्मृतोमहेश्वरस्त्र्यंबकएवनापरः।।त
थाविदुर्मांमुनयःशास्त्रकृत्तुंद्वितीयगामीनहिशब्दएषनः।।७९।।

लक्षैवेतिलणादयः।नास्माकंहरिहरयोर्ममचेत्यर्थः।एषत्रतयोपिशब्दोद्वि
तीयगामीनहि।द्वितीयाप्रकरणेगम्यादीनामुपसंख्यानात्समासः।।७९।। ।।

र.स.टी.
१७

अतरति। अतः अहमेव शक्तुरनस्त्वदीयस्य पितुः अयं शमो श्वः। कपिलानुसारिणा कपिलमुनुतुल्पेन भयापहरिंतो अपहृतः। अपहारित इति स्वार्थे णिच्। तयात्राशी प्रयत्नेनालं प्रयत्नो म्यका रित्यर्थः। निषेधस्ये लिनिषेधं

अतोयमश्वः कपिलानुसारिणापितुस्त्वदीयस्ययया पहरितः।
अलंप्रयत्नेनतवात्रमानुगाः पदंपदव्याः सगरस्यसंततेः॥५०॥

प्रतिकरणत्वात्तृतीया। सगरस्यराज्ञः संततेः संतानस्यपदंमानिधाः। मानिधेहि इति। निपूर्वाद्धातेर्लङ्। नमाङ्योग इत्याडागमप्रतिषेधः। मद्दास्कंदनं तेविनालमलंमेचेदितिभावः॥५०॥ ॥

१७ ॥

तरति। ततस्तुरगस्य रक्षिता रघुः प्रहस्य प्रहासं कृत्वा अपभयो निर्भीकः स
न् पुनः पुरंदरं बभाषे किमिति हे देवेंद्र एष अश्वमोचरूपस्ते तव सर्गो निश्चयो
यदि। सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिष्वित्यमरः। तर्हि शस्त्रं गृहाण भ
वान् रघुं मामनिर्जित्य कृत्यमनेनेति कृती कृतकृत्यो न खलु दृष्टादिभ्यश्चेति नित्र
ततः प्रहस्यापभयः पुरंदरं पुनर्बभाषे तुरगस्य रक्षिता। गृहाण शस्त्रं यदि सर्ग
एषते न खल्वनिर्जित्य रघुं कृती भवान् ॥५१॥ स एवमुक्त्वा मघवंतमुन्मुखः करि
ष्यमाणः सशरं शरासनं। अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेण विडंबितेश्वरः ॥५२॥
त्ययः। रघुरहणदात्मनो दुर्जयत्वं सूचितं ॥५१॥ स इति। स रघुरुन्मुखः सन् मघवंतं
मिंद्रमेवमुक्त्वा शरासनं चापं सशरं करिष्यमाणः आलीढेन आलीढाख्येन स्थानक
भेदेन विशेषशोभिता अतिशयशोभिना वपुःप्रकर्षेण देहोन्नतेन विडंबितेश्वरोऽनुकृ
तपिनाकीसन् अतिष्ठत्। आलीढलक्षणमाह। यादवः। स्थानानि धन्विनां पत्र च तत्र वैशा
षसस्त्रियां। त्रिषु वितस्त्यंतरौ पादौ मंडलं तोरणं कृतिः। अन्वर्थः स्यात् समपदमालीढं तु ततो

र·स·त·
१८

रघोरिति। रघोरवष्टंभमयेन स्तंभरूपेण। अवष्टंभः सुवर्णे च स्तंभारंभयोरिति
विश्वः। पत्त्रिणा बाणेन हृदि हृदये क्षतो विद्धः अत एवामर्षेण सहनक्रुधरित्यर्थः। गोत्र
भिदपींद्रोपि। संभावनीय घोरेपि गोत्रः क्षोणीधरे मतः इति विश्वः। नवांबुदानां अनी
कस्य मुहूर्तं क्षणमात्रं लांछने चिन्हभूते धनुषि दिव्ये यशुचीत्यर्थः। अमोघमवध्यं सा

रघोरवष्टंभमयेन पत्त्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः॥ नवांबुदानीकमुहूर्त
लांछने धनुष्यमोघं समधत्त सायकं॥५३॥ दिलीपसूनोः स बृहद्भुजांतरं प्र
विश्य भीमासुरशोणितोचितः॥ पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव म
नुष्यशोणितं॥५४॥ ॥ ॥

यकं समधत्त संहितवान्॥५३॥ दिलीपेति। भीमानां भयंकराणामसुराणां शोणिते
रुधिरे उचितपरिचितः स रंध्रमुक्त आसुगः सायकः दिलीपसूनोः रघोः बृहतो वि
शालं भुजांतरं वक्षः प्रविश्य अनास्वादितपूर्वं पूर्वमनास्वादितं सुप्सुपेति समासः
मनुष्यशोणितं कुतूहलेनेव पपौ॥५४॥

१८

हरेरिति। कुमारस्य विक्रम इव विक्रमो यस्य स तथोक्तः। सप्तम्युपमानपूर्वस्येत्या
दिना समासः। कुमारो ऽधुरपि सुरद्विपस्यैरावतस्य आस्फालनेन कर्कशा अंगु
लयो यस्य स तस्मिन् शच्याः पत्त्रविशेषकैरंकिते शचीपत्रविशेषकांकिते हरे

हरेः कुमारोऽपि कुमारविक्रमः सुरद्विपास्फालनकर्कशांगुलौ॥
भुजे शचीपत्रलताक्रियोचिते स्वनामचिह्नं निचखान सायकं॥५५॥

रिंद्रस्य भुजे स्वनामचिह्नं स्वनामांकितं सायकं निचखान निखातवान्। निष्कंटक
राज्यमत्तस्यायं महनाभिभवत्त इति भावः॥५५॥ ॥ ॥

र॰ स॰ त॰
९९

जहारेति । अन्येन मयूरपत्रिणा मयूरपत्रवता शरेण शक्रस्येंद्रस्य महाशनिध्वजः महांतमशनिस्वरूपध्वजं जहार चिच्छेद स शक्रः सुरश्रियः प्रसह्य बलात् कृत्य केशानां व्यपरोपणं इव तरणात् । छेदनादिव तस्मै रघवे न्टशामत्यर्थं चुकोप तं हंतुमियेषेत्यर्थः । क्रुधद्रुहेत्यादिना संप्रदानाच्चतुर्थी ॥५६॥ तयोरिति । जयैषि

जहार चान्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजं ॥ चुकोप
तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ॥५६॥ तयोरु
पांतस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः ॥ बभूव युद्धं तु
मुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च सायकैः ॥५७॥ ॥ ॥

णोस्तयोः इंद्ररघ्वोः गरुत्मंतः पक्षवंतः गरुत्पक्षच्छदाः पत्रमित्यमरः । आशिषिदं
दंष्ट्रयां विषं येषां ते । आशीविषाः । सर्पाः । पृषोदरादित्वात्साधु । आशीरुरगदंष्ट्रायां
मित्यमरः । तद्वद्भीमदर्शनात् । सपक्षाः सर्पा इव दंष्ट्रानां भयाचहा इत्यर्थः । तैरधो
मुखैश्च ध्वनिनो रूपर्यधो देशाद्यौच्छिनत्वादिति भावः । पत्रात्तत्रिभिर्वाणैः उपांतस्थिताः
तटस्थाः सिद्धा देवाः इंद्रस्य सैनिकाश्च रघोर्यस्मिन् तथोक्तं तुमुलं संकुलं युद्धं बभूव ॥५७॥

९९

अतीति। वासवोग्रलिबंधने निसां तयेन प्रहिताभिः प्रयुक्ताभिः अस्त्रवृष्टिभिः
दुःप्रसहस्य दुःखेनातिसहस्येत्यर्थः। तेजसः प्रतापस्य आश्रयं तं रघुं अंबुदोऽद्भिः
।स्वितश्चुतं वह्निभिव निर्वापयितुं न शशाक। रघोरपि लोकपालात्मकत्वं प्राशासंभ
वत्वादितिभावः॥५८॥ तदिति। ततो रघुः हरिचंदनांकिते प्रकोष्ठे मनिबंधे मथ्यमना

अतिप्रबंधप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुःप्रसहस्य तेजसः॥ शशाक निर्वा
पयितुं न वासवः स्वतश्चुतं वह्निमिवाद्भिरंबुदः॥५८॥ ततः प्रकोष्ठे हरिचंदनां
किते प्रमथ्यमानार्णवधीरनादिनीं॥ रघुः शशांकार्धमुखेन पत्रिणा शरासनो
ज्यामलुनाद्बिडौजसः॥५९॥ ॥ ॥

र्णवधीरनादिनीं प्रमथ्यमानार्णवस्य वधीरं गंभीरं नदतीति नादिनीं तथोक्तं चेयष्टिव्याप्नो
तीति। निष्विडं व्यपक्रमोजीयस्य तस्य बिडौजस इंद्रस्य पृषोदरादित्वात्साधुः। शरा
सनज्यां धनुर्मौर्वीं शशांकस्य अर्धखंड इव मुखं यस्य तेन पत्रिणा अलुनाद्विछिनत्॥५९॥

सरति।विरधमत्सरः प्ररक्षवैव: सरंभश्चापमुत्सज्य प्रबलस्यविद्विषःशत्रोःप्र
णाशनायवधायमहींधारयंतीतिमहीध्राःपर्वताःमूलविभुजादित्वात्कप्रत्ययःते
षांपक्षव्यपरोपणेपक्षछेदेउचितंस्फुरत्प्रभामंडलमस्त्रंवज्रमायुधमादेदेजग्राह
।६०।रघुरिति।रघुस्तेनवज्रेणभृशमत्यर्थंवक्षसिताडितोहतःसन्सैनिकानामश्रुभिः

सचापमुत्सृज्यविवृद्धमत्सरःप्रणाशनायप्रबलस्यविद्विषः।।महीध्रपक्षव्य
परोपणोचितंस्फुरत्प्रभामंडलमस्त्रमाददे।।६०।।रघुर्भृशंवक्षसितेनताडितः
पपातभूमौसहसैनिकाश्रुभिः।।निमेषमात्रादवधूयतद्व्यथांसहोत्थि
तःसैनिकहर्षनिस्वनैः।।६१।। ।। ।।

सहभूमौपपात।तस्मिन्पतितेरुरुदुरित्यर्थः।निमेमात्रात्तद्व्यथांदुःखमवधूय
तिरस्कृत्यसैनिकानांहर्षनिस्वनाःक्ष्वेडास्तैःसहोत्थितश्चतस्मिन्नुत्थितेहर्षात्तेसिं
हनादानचक्रुरित्यर्थः।।६१।। ।। ।।

तथापीति। यत्र घाते शस्त्राणां व्यवहारेण व्यापारेण निष्ठुरे क्रूरे विपक्षभावे चिरं
तस्थुषः। स्थितिवतोस्य रघोर्वीर्यातिशयेन वृत्रं हतवानिति। वृत्रहा परवृत्तेषु द्धि
प्रा। तुतोष पयस्तु यं वीरं जानातीति भावः। कथं शत्रोः संतोषो तत्राह। गुणैः सर्वत्र शत्रु
मित्रोदासीनेषु पदमास्थिर्निधीयते। गुणैः सर्वत्र संक्रम्यत इत्यर्थः।। गुणाः शत्रुनथा

तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः।। तुतोष
वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते।।६२।। असंगमद्रि
ष्वपि सारवत्तया मे न त्वदन्येन विसोढमायुधं।। अवेहि मां प्रीत मृते
तुरंगमाद्वरं वृणीष्वेति तमाह वासवः।।६३।। ।। ।।

वर्जयंतीति भावः।।६२।। असंगमिति। सारवत्तया अद्रिषु असंगमप्रतिबंधं मे। आ
युधं वज्रं त्वदन्येन न विसोढं। अतो मां प्रीतं संतुष्टमवेहि। तुरंगमादृते तुरगं वर्जयित्वा
। अन्यारादितरार्त्तेयति पंचमी।। किमिच्छसीति स्फुटं वासव आह।। तुरगं मादन्यद्दे
यमस्तीति भावः।।६३।। ।। ।।

ततो निषंगादसमग्रमुद्धृतं सुवर्णपुंखद्युतिरंजितांगुलिः।
नरेंद्रसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरं॥६४॥

ततइति। ततो नरेंद्रसूनुः रघुः निषंगात्तूणीरात्। असमग्रं यथा तथोद्धृतं सुवर्णपुं
खद्युतिभिरंजिता अंगुलयो येन तं मिषुं प्रतिसंहरन्निवर्तयन् प्रतिसंहरणं प्रहरेदि
ति निषेधादिति भावः॥ प्रियं वदतीति प्रियंवदः॥ प्रियवशे वदः खजितिखच्प्रत्ययः॥
अरुर्द्विषेत्यादिना मुमागमः॥ सुरेश्वरं प्रत्यवदत् नतु प्राहरदिति भावः॥६४॥ अमोच्य

अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि॥ अज
स्रदीक्षाप्रयतः समद्गुरुः क्रतोरशेषेण फलेन युज्यतां॥६५॥ यथा च
वृत्तांतमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः॥ तवैव संदेश
हराद्विशांपतिः शृणोति लोकेश तथा विधीयतां॥६६॥ ॥ ॥

मितीति। हे प्रभो इंद्र अश्वं मोच्यं मन्यसे यदि तत् तर्हि अजस्रदीक्षायां सततं दीक्षायां प्र
यतः स मद्गुरुर्मम पिता विधिनोक्तकर्मणि समाप्ते सति क्रतोः यत्फलं तेन फलेनाशेषे
ण कृत्स्नेन युज्यतां युक्तोऽस्तु॥ अश्वमेधमूललाभे किमश्वेनेति भावः॥६५॥ यथेति॥ स
दोगतः सदोगृहंगतः त्रिलोचनस्येश्वरस्य एकांशतया अष्टानामन्यतमम् मूर्तित्वात्॥ दुरा
सदो मादृशैर्दुःप्रयो विशांपतिर्यथा स्मं वृत्तांतं वा॥ वृत्तांतः स्यात्प्रकरणे प्रकारेकात्स्न्यवार्तयोः

तथेति। मातलिसारथिः इंद्रः रघोः संबंधिनं कामं मनोरथं तथेत्ति तथास्त्विति प्रति
शुश्रुवान्। भाषायां सदवसश्रुवः इति क्वसुप्रत्ययः। यथागतं ययौ सुदक्षिणासूनु
रपि नातिप्रमनाः। विजयलाभेप्यश्वनाशान्नातितुष्टः सन्। नञर्थस्य नशब्दस्य
सुप्सुपेति समासः। नृपस्य सदोग्रहं प्रतिन्यवर्तत। ६७। तमिति। हरेरिंद्रस्याश्वस

तथेति कामं प्रतिशुश्रुवान् रघोर्यथागतं मातलिसारथिर्ययौ। न
पस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत। ६७। त
मभ्यनंदत्प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः। पराम
शन् हर्षजडेन पाणिना तदीयमंगं कुलिशप्रणांकितं। ६८। ।

न हरिणा पुरुषेण प्रथमं प्रबोधितो वृत्तांतमिति शेषः। प्रजेश्वरो दिलीपः। हर्षेण ज
डेन हर्षेण शिशिरेण पाणिना कुलिशव्रणांकितं तस्य रघोरिदं तदीयं अंगं शरीरं परामृ
शन् तं रघुमभ्यनंदत्। ६८। । ।

र·स·टी·
२३

इत्ती। ति। महनीयशासनपूजनीयाज्ञः। क्षितीशइतिमहाक्रतूनामश्वमेधा
नांनवभिरधिकांनवतिंएकोनंशतमायुषः। क्षयेसतिदिवंस्वर्गंआरुरुक्षुः

इतिक्षितीशोनवा। तिंनवा। धिकांमहाक्रतूनामहनीयशासनः।।
समारुरुक्षुर्दिवमायुषःक्षयेततानसोपानपरंपरामिव।।६९।।

आरोढुमिच्छुः। सोपानानांपरंपरापक्तिंमिवततान।।६९।। ।। ।। २३

अथेति। अथ विषयेभ्यो व्यावृत्तात्मा निवृत्तचित्तः। स दिलीपो यथाविधि यथाशास्त्रं यूने सूनवे नृपतिककुदं राजचिन्हं। ककुद्म ककुदं श्रेष्ठे वृषांके राजलक्ष्मणीति विश्वः। सीतातपवारणं श्वेतछत्रं दत्वा तया देव्या सुदक्षिणया सह मुनिवनतरोः छायां शिश्रिये श्रितवान् वानप्रस्थाश्रमं स्वीकृतवानित्यर्थः। तथा हि। गलितवयसां

अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिककुदं दत्वा यूने सीतातपवारणं। मुनिवनतरुछायां देव्या तया सह शिश्रिये गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतं। ७०।

वृद्धानां रक्षाकूणा मिक्ष्वाकोर्गोत्रापत्यानां तद्राजसंज्ञिकत्वात् तअणो लुक्। इदं वनगमनं कुलव्रतं कुलं हि व्रतं हि देव्या सहेत्य... पत्नीकः वानप्रस्थाश्रमपक्षे। उक्तं। तथा याज्ञवल्क्यः। सुतं विन्यस्य पत्नीके [illegible]नुगतो वने। वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेदिति हरिणीवृत्तमेतत्। ७०। । इति तृसर्गटीका समाप्तः। । ।

माघ

॥ ॥इतिरघुवंशामाहाकाव्ययशसेर्थकालिदासकृतौतृतीयसर्गःसमाप्तः॥

॥ चतुर्थसर्गप्रारंभः॥

रघुवं.टी.स. १ ॥श्रीगणेशाय नमः॥ शारदा शारदांभोजवदना वदनांबुजे॥ सर्वदा सर्वदास्माकं संनिधिं संनिधिं क्रियात्॥ सर्ग.४

१॥ स इति॥१॥ सः रघुः गुरुणा पित्रा दत्तं राज्यं राज्ञः कर्म प्रजापालनात्मकं॥ पुरोहितवद्दिलाद्यक॥
प्रतिपद्य प्राप्य दिनांते सायंकाले सवित्रा सूर्येण निहितं तेजः प्रतिपद्य हुताशनो ऽग्निरिव अधिकं ब
भौ॥ सौरं तेजः सायमग्निं संक्रमते॥ आदित्यो वा अस्तं यन्नग्निमनुप्रविशति॥ अग्निं वादित्यः॥ सायं प्रवि

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ॥ दिनांते निहितं तेजः सवित्रेव हुताशनः॥१॥ न्यस्त
शस्त्रं दिलीपं च तं च शुश्रूषुषां पतिं॥ राज्ञामुद्धृतनाराचे हृदि शल्यमिवार्पितं॥२॥ दिलीपा
नंतरं राज्ये तं निशम्य प्रतिष्ठितं॥ पूर्वं प्रधूमितो राज्ञां हृदये ऽग्निरिवोत्थितः॥२॥ ॥ ॥

आनीत्यादिश्लोकः प्रमाणं॥१॥ दिलीपेति॥ दिलीपानंतरं राज्ये प्रतिष्ठितमवस्थितं तं रघुं निशम्याकर्ण्य पूर्वं
दिलीपकाले राज्ञां हृदये प्रकर्षेण धूमो ऽस्य संजातः प्रधूमितो ऽग्निः संतापाग्निरुत्थित एव प्रज्वलित एव॥
पूर्वादप्यधिकः संतापो ऽभूदित्यर्थः॥ राजकर्तृकस्यापि निशमनस्याग्नौ उपचारात् समानकर्तृकत्वविरोधः
त्यर्थः॥२॥

१

पुरुहूतेति॥ ॥पुरुहूतध्वजः इंद्रध्वजः॥ स किल वृष्ट्यर्थं राजभिः पूज्यत इत्युक्तं भविष्यो
त्तरे एवं यः कुरुते यात्रामिंद्रकेतोर्युधिष्ठिर॥ पर्जन्यः कामवर्षी स्यात्तस्मिन्राज्ये न
संशय इति॥ पुरुहूतध्वजस्येव तस्य रघोर्नवाभ्युत्थानमभ्युन्नतिमभ्युदयं च नवाभ्युत्थान
दर्शिन्यः॥ उर्ध्वं स्थिता उन्नसिताश्च नयनपंक्तयो यासां ताः सप्रजानाः समंतानाः प्र

पुरुहूतध्वजस्येव तस्योन्नयनपंक्तयः॥ नवाभ्युत्थानदर्शिन्यो ननंदुः सप्रजाः प्रजाः॥३
सममेव समाक्रांतं द्वयं द्विरदगामिना॥ तेन सिंहासनं पित्र्यमखिलं चारिमंडलं॥४॥ ॥

जास्यात्संततौ जनरत्सुनयत्राप्यमरसिंहः ननंदुः॥३॥ सममिति॥ द्विरद इव द्विरदस्तद्वा
गच्छतीति द्विरदगामिना॥ कर्तुर्युपमाने सुप्यजातौ णिनिः॥ तेन रघुणा समं युगपदेव द्व
यं समाक्रांतमधिष्ठितं॥ किं तद्द्वयं॥ पितुरागतं पित्र्यं॥ पितुर्यदिति यत्प्रत्ययः॥ सिंहासनम
खिलं चारिणां मंडलं राष्ट्रं च॥४॥ ॥

अथसिंहासनारोपणानंतरंतस्यलक्ष्मीसन्निधानमाह॥ ॥छायेति॥ ॥अत्ररघोस्तेजो
विशेषणस्वयंसन्निहितयालक्ष्म्याछत्रधारणंकृतमित्युत्प्रेक्ष्यते॥पद्मालक्ष्मीः॥ल
क्ष्मीःपद्मालयापद्माकमलाश्रीर्हरिप्रियाइत्यमरः॥सास्वयंअदृश्याकिलकिलेतिसं
भावनायां॥सतीछायामंडललक्ष्येणकांतिपुंजानुमेयेननतुस्वरूपतोदृश्येन॥छायामंड

छायामंडललक्ष्येणतमदृश्याकिलस्वयं॥पद्माप
द्मातपत्रेणभेजेसाम्राज्यदीक्षितं॥५॥ ॥

लमित्यनेनचातपत्राकारंदृश्यते॥छायासूर्यप्रियाकांतिःप्रतिबिंबमनातपइत्यमरः॥
पद्मरः॥तेनपद्मातपत्रेणपद्ममेवातपत्रंतेनकारणभूतेनसाम्राज्येसाम्राज्यकर्मणि
मंडलाधिपत्येदीक्षितमभिषिक्तंतंभेजे॥अन्यथाकथमेतादृशीकांतिसंपत्तिरिति
भावः॥५॥ ॥श्रीकृष्णपरमात्मनेनमः॥ ॥

संप्रति सरस्वतिसान्निध्यमाह ॥ ॥परिकल्पितेति ॥ ॥सरस्वतीकालिकलेसर्वेष्वपियोग्यका
लेषुनित्यविसयोरितिवीप्सायांद्विर्वचनं ॥ बंदिषुपरिकल्पितसांनिध्याक्कृतसंनिधानासनी
स्तुत्यंस्तोत्रांईरघुंअर्थ्याभिरर्थादनपेताभिः ॥ धर्मपथ्यर्थन्यायादितियत्प्रत्ययः ॥ स्तुतिभिःस्तो
त्रैःउपतस्थे ॥ देवताबबुध्यापूजितवतीत्यर्थः ॥ देवतात्वंवना विस्मुष्टथिवीपतिरितिवालो

परिकल्पितसांनिध्याकालिकालेषुबंदिषु ॥ स्तुत्यंस्तुतिभिरर्थ्याभिरुपतस्थेस
रस्वती ॥ ६ ॥ मनुप्रभृतिभिर्मान्यैर्भुक्तायद्यपिराजभिः ॥ ॥श्रीः ॥ ॥

कपालात्मकत्वादित्यनुसंधेयं ॥ एवंसतिअपाद्देवपूजासंगतिकरणपथिक्षितिवर्त्तमाना
दात्मनेपरंसिध्यति ॥ ६ ॥ मन्विति ॥ ॥वसुंधरामनुप्रभृतिभिर्मन्वादिभिर्मान्यैःपूज्यैः
राजभिःभुक्तायद्यपिभुक्तेवेत्यर्थःयद्यपीत्यवधारणे ॥ ॥श्रीरामः ॥ ॥

त्र्यप्यर्थेयदिवार्थेस्यादितिकेशवः॥तथापितस्मिन्राज्ञिअन्यःपूर्वोपस्याःसाअन्यपूर्वाअ
न्यपूर्वानभवतीत्यनन्यपूर्वाऽअनन्योपभुक्तेवासीत्॥तत्प्रथमपथिकेवानुरक्तेवतीत्य
र्थः॥७॥ ॥अत्रकारणमाह॥ ॥सइति॥ ॥यस्मात्कारणात्सरघुःयुक्तदंडतयायथाप
राधदंडतयासर्वलोकस्यमनःआददेजहार॥कथमिवअतिशीतोऽत्युष्णोनभवती

॥ तथाप्यनन्यपूर्वेवतस्मिन्नासीद्वसुंधरा॥७॥सहिसर्वस्यलोकस्य
युक्तदंडतयामनः॥आददेनातिशीतोष्णोनभस्वानिवदक्षिणः॥८॥॥

तिनातिशीतोष्णः॥नञर्थस्यनशब्दस्यसुप्सुपेतिसमासः॥दक्षिणोदक्षिणादिग्भवो
नभस्वान्वायुरिवमलयानिलइवेत्यर्थः॥युक्तदंडतयेत्यत्रकामंदकः॥उद्वेजयतितीक्ष्णे
क्ष्णेनमृदुनापरिभूयते॥दंडेननृपतिस्तस्माद्युक्तदंडःप्रशस्यतइति॥८॥ ॥

तृ

मंदेति॥ ॥तेनरघुणाप्रजाःगुरोदीलीपेविषयेसहकारोअतिसोरभःचूतः॥आम्रश्चूतोर
सालोसौसहकारोतिसोरभइत्यमरः॥तस्यफलेनपुष्पोद्गमेपुष्पोदयइवततोपिगुणाधि
कतयाहेतुनामंदोत्कंठाः॥अस्मिन्नुत्सुकाःकृताःगुणोत्तरश्चउत्तरोविषयःपूर्वविस्मापय
तीतिभावः॥९॥ ॥नयेति॥नयविद्भिर्नीतिशास्त्रज्ञैर्नवेतस्मिन्राज्ञिविषयेतमधिकृत्ये

मंदोत्कंठाःकृतास्तेनगुणाधिकतयागुरो॥फलेनसहकारस्यपुष्पोद्गमइवप्रजाः॥९॥
नयविद्भिर्नवेराज्ञिसदसच्चोपदर्शितं॥पूर्वएवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः॥१०॥

त्यर्थः॥सद्धर्मयुधादिकंचअसत्कूटयुधादिकंचोपदर्शितंतस्मिन्राज्ञिपूर्वएवपक्षअभ
वत्॥संक्रांतइत्यर्थः॥उत्तरःपक्षोनाभवत्नसंक्रांतइत्यर्थः॥तत्रसदसतोर्मध्येसदे
वाभिमतंनासत्ततज्ज्ञानंतुहानार्थमेवेत्यर्थः॥पक्षःसाधनयोग्यार्थः॥पक्षःपार्श्वगरु
त्साध्यसहायबलेष्वितिकेशवः॥१०॥ ॥

पंचानामिति ॥ ॥ पृथिव्यादीनां पंचानां भूतानामपि गुणाः गंधादयः उत्कर्षं अतिशयं पुपुषुः ॥
अत्रोत्प्रेक्ष्यते ॥ तस्मिन् रघौ नाम नवे महीपाले सति सर्ववस्तुजातं नवमिवाभवत् ॥ तदे
वभूतः जातं इदानीं अपूर्वगुणयोगादपूर्वमिवाभवदिति भावः ॥ ११ ॥ ॥ यथेति ॥ ॥ यथाचं
द्रयत्याह्लादयतीति चंद्रः इंदुः ॥ चदि धातो रोणादिको रप्रत्ययः ॥ प्रह्लादनादाह्लादकर

पंचानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः ॥ नवे तस्मिन्महीपाले सर्वं नवमिवाभवत् ॥ ११ ॥
यथा प्रह्लादनाच्चंद्रः प्रतापात्तपनो यथा ॥ तथैव सोऽभूदन्वर्थो राजा प्रकृतिरंजनात् ॥ १२ ॥

णादन्वर्थोऽनुगतार्थनामकोऽभूत् ॥ यथा च ॥ तथा च ॥ तपतीति तपनः सूर्यः ॥ नंद्यादि
त्वाल्ल्युप्रत्ययः ॥ प्रतापात् संतापजननादन्वर्थः ॥ तथैव स राजा प्रकृतिरंजनादन्वर्थः ॥
सार्थकः राजशब्दोऽभूत् ॥ यद्यपि राजशब्दो राजते दीप्यत्यर्थात् कनीन् प्रत्ययांतो न तु र
जेः ॥ तथापि धातूनामनेकार्थत्वाद्रंजनाद्राजेत्युक्तं कविना ॥ १२ ॥ ॥

काममिति॥ ॥विशालेतस्यरघोर्लोचनेकार्मककर्णांतयोर्विश्रांतेकर्णांतविश्रांतगतेचक्षुष्मत्तातुच
क्षुषःफलंत्वित्यर्थः॥ सूक्ष्मान्कार्यार्थान्कर्त्तव्यार्थान्दर्शयतीप्रकाशयतीति॥ सूक्ष्मान्कार्या
र्थदर्शिनाशास्त्रेणेवशास्त्रदृष्टिर्विवेकिनामितिनावः॥१३॥ ॥लब्धेति॥ ॥अथलब्धस्यरा
ज्यस्यप्रशमनेनपरिपंथिनामनुरंजनप्रतीकाराभ्यांस्थिरीकरणेनस्वस्थंसमाहितचित्तंएनं

कार्मककर्णांतविश्रांतेविशालेतस्यलोचने॥ चक्षुष्मत्तातुशास्त्रेणसूक्ष्मकार्यार्थदर्शिना॥१३॥
लब्धप्रशमनस्वस्थमथेनंसमुपस्थिता॥ पार्थिवश्रीर्द्वितीयेवशरत्पंकजलक्षणा॥१४॥
निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मासुदुःसहः॥ प्रतापस्तस्यभानोश्चयुगपद्व्यानशेदिशः॥१५॥

पंकज

रघुं[कमल]लक्षणा,पद्मचिह्नाश्रियोपिविशेषणमेतत्॥ शरद्द्वितीयापार्थिवश्रीराजलक्ष्मीरिवस
मुपस्थिताप्राप्ता॥१४॥ ॥निर्वृष्टेति॥ ॥निःशेषंवृष्टानिर्वृष्टाःकर्त्तरिक्तः॥ अतएवलघवस्तैर्मेघै
र्मुक्तवर्त्मात्यक्तमार्गः॥ अतएवसुदुःसहः तस्यरघोःभानोश्चप्रतापःपौरुषमातपश्च॥ प्रता
पौपौरुषातपावितियादवः॥ युगपद्दिशोव्यानशेव्याप॥१५॥ ॥

वार्षिकमिति॥ ॥इंद्रो वर्षासु भवं वार्षिकं॥ वर्षानिमित्तमित्यर्थः॥ वर्षाभ्यष्ठगिति ठक्प्रत्ययः॥ धनुः संजहा
र॥ रघुः जैत्रं जयशीलं जैत्रं॥ जैत्रशब्दात् तृन्नंतात् प्रज्ञादिभ्यश्चेति स्वार्थे अण्प्रत्ययः॥ धनुर्दधौ॥ हि यस्मा
त्तावुभौ इंद्ररघू प्रजानामर्थस्य प्रयोजनस्य वृष्टिविजयलक्षणसाधनविषये पर्यायेणउद्यते कार्मुके याभ्यां तौ
पर्यायोद्यतकार्मुकौ॥ पाठांतरे॥ पर्यायेणोद्यमो विश्रमश्च ययोस्तौ पर्यायोद्यमविश्रमौ॥ द्वयोः पर्यायक

अधिज्यमायुधं कर्त्तुं समयोयं रघोरिति॥ स्वं धनुः शंकितेनेव संजह्रे शतमन्युना॥१६॥ वार्षिकं
संजहारेंद्रो रघुर्जैत्रं धनुर्दधौ॥ प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ॥१६॥ पुंडरीकातपत्रस्तं
विकसत्काशचामरः॥ ऋतुर्विडंबयामास न पुनः प्राप तच्छ्रियं॥१७॥ ॥

रणाद् क्लेश इति भावः॥१६॥ पुंडरीकेति॥ ॥पुंडरीकं सितांभोजमेवातपत्रं यस्य सः॥ तथोक्तः॥
विकसंति काशानि काशाख्यतृणकुसुमान्येव चामराणि यस्य सः॥ तथोक्तः॥ ऋतुः शरदृतुः पुंडरी
कैः सितातपत्रं काशानि च चामरं तं रघुं विडंबयामास अनुचकार॥ तस्य रघोः श्रियं पुनः शोभां तु
न प्राप॥ शोभा संपत्तिः पद्मा सुलक्ष्मीः श्रीरिव दृश्यते इति शाश्वतः॥१७॥ ॥श्रीरामः॥ ॥ ॥

प्रसादेति।।नसुमुखेतस्मिन्रघौविशदप्रभे।।निर्मलकांतौचंद्रेचद्वयोर्विषयेतदाचक्षुष्मतांप्रीतिरनुराग
:समरसासमस्वादातुल्यभोगेतियावत्।।रसोगंधेरसःस्वादइतिविश्वः।।आसीत्।।१८।।हंसेति।।हंसा
नांश्रेणीषुपंक्तिषुतारासुनक्षत्रेषुकुमुदानियेषुसंतीतिकुमुद्वंति।।कुमुद्प्रायेष्वित्यर्थः।।कुमुद्वान्

प्रसादसुमुखेतस्मिंश्चंद्रेचविशदप्रभे।।तदाचक्षुष्मतांप्रीतिरासीत्स
मरसाद्वयोः।।१८।।हंसश्रेणीषुतारासुकुमुद्वत्सुचवारिषु।।विभूत
यस्तदीयानांपर्यस्तायशसामिव।।१९।। ।।कुमुद्प्रायइत्यमरः।।कुमुदनड्वेतसे
भ्योड्मतुप्।।तेषुवारिषुच।।तदीयानांरघुसंबंधिनांयशसांविभूतयःसंपदःपर्यस्ताइवप्रसारि
ताःकिमित्युत्प्रेक्षा।।अन्यथाकथमेषांएषधवलिमेतिभावः।।१९।। ।।

इक्षवि ति॥ ॥इक्षुर्णा छाया इक्षुछायं॥ छाया बाहुल्य इति नपुंसकत्वं॥ तत्र निषण्णा इक्षुछाया निषादिन्य
॥ स्त्रीलिंगपाठे तु इक्षोः छायेति विग्रहः॥ अन्यथा बहुत्वे नपुंसकत्वप्रसंगात्॥ शालीन् गोपायंतीति श
ालिगोप्यः॥ सस्यपालिकाः स्त्रियः॥ कर्मण्यण्॥ टिड्ढाणञित्यादिना ङीप्॥ गोप्तुः रक्षकस्य त
स्य रघोः गुणोदयं गुणोदयो यस्य तद्गुणोदयं गुणोत्कर्षं॥ आकुमारं कुमारमारभ्य कथोद्घातः कथारंभो य

इक्षुछायानिषादिन्यस्तस्य गोप्तुर्गुणोदयं॥ आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः॥ २०॥ ॥

स्य तत् आकुमारं रघोरपि स्तूयमानमित्यर्थः॥ यशो जगुः॥ गायंति स्म॥ अथवा आकुमारस्य सतो रघोः याः क
थाः दिग्विजयादयः तत आरभ्य॥ आकुमारकथं तत्राप्यभिविधावव्ययीभावः॥ आकुमारकथां उ
द्घातो यस्मिन्कर्मणि गानक्रियाविशेषणमेतत्॥ स्यादभ्यादानमुद्घात आरंभ इत्यमरः॥ आकुमारको
द्घातमिति पाठे॥ कुमारस्य सतस्तस्य कथा निश्चरित्रे रुद्घातं यथा स्यात्तथा आरभ्य यशो जगुरिति व्याख्ये
यं॥ २०

प्रससादेति ॥ ॥ महौजसः कुंभयोनेरगस्त्यस्य ॥ अगस्त्यः कुंभसंभव इत्यमरः ॥ उदयादनंतरं प्रससाद
प्रसन्नं बभूव महौजसो रघोरुदयादभिभवाशंकि द्विषतां मनः चुक्षुभे कालुष्यं प्राप ॥ अगस्त्योदये ज
लानि प्रसीदंतीत्यागमः ॥ २१ ॥ ॥ मदेति ॥ मदोदग्रा मदोद्धताः ॥ ककुदेषामस्तीति ककुद्मंतः महाक
कुद इत्यर्थः ॥ यवादित्वान्मकारस्य वत्वाभावः ॥ सरितां कूलानि रुजंतीति कूलमुद्रुजाः ॥ उदि कूले

तस्य गोप्तुर्द्विरेफार्णाकर्णेत्यल निपातितं ॥ स्वरसंवादिभिः कंठैः शालिगोप्यो जगुर्यशः ॥ २१ ॥
प्रससादोदयादंभः कुंभयोनेर्महौजसः ॥ रघोरभिभवाशंकि चुक्षुभे द्विषतां मनः ॥ २१ ॥ मदोदग्रा
ः ककुद्मंतः सरितां कूलमुद्रुजाः ॥ लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमं ॥ २२ ॥ ॥

रुजिवहोरिति खश्प्रत्ययः ॥ अरुर्द्विषेत्यादिना मुमागमः ॥ महांतः उक्षाणः महोक्षाः ॥ अचतुरे
त्यादिना निपातनादकारांतत्वं ॥ लीलाखेलं विलासमनुगतं तस्य रघोः उत्साहवतो वपुष्मंतोः परमंज
कस्य विक्रमं शौर्यमनुप्रापुः अनुचक्रुः ॥ २२ ॥ ॥ श्रीरामः ॥ ॥

प्रसवैरिति॥ ॥मदस्येवगंधोयेषांतेमदगंधिनः॥उपमानाच्चेतिसमासांतइकारः॥सप्तपर्णानांवृक्ष
विशेषाणां॥सप्तपर्णोविशालत्वक्शारदोविषमच्छदइत्यमरः॥प्रसवैःपुष्पैराहतास्तस्यरघोर्नागाः
गजाः॥गजेपिनागमातंगावित्यमरः॥असूययेवआहतनिमित्तयास्पर्धयेवसप्तधेवप्रसुस्रुवुः॥
मदंववृषुः॥प्रतिगजगंधाघ्रानिमानादितिभावः॥करात्कटाभ्यांमेढ्राच्चनेत्राभ्यांमदस्रुतिपालकाव्ये॥क

प्रसवैःसप्तपर्णानांमदगंधिभिराहताः॥असूययेवतन्नागाःसप्तधैवप्रसुस्रुवुः॥२३॥सरितः
कुर्वतीगाधाःपथश्चाश्यानकर्दमान्॥यात्रायैप्रेरयामासतंशक्तेःप्रथमंशरत्॥२४॥ ॥

राज्ञासारंप्राप्स्यामित्यर्थः॥२३॥ ॥सरितइति॥सरितोगाधाःसुप्रतराःकुर्वतीपाथोमार्गांश्चा
श्यानकर्दमान्शुष्कपंकान्कुर्वती॥संयोगादेरातोधातोर्यण्वतइतिनिष्ठायतेर्निष्ठानत्वं॥शरदृतुः
॥तंरघुंशक्तेरुत्साहशक्तेःप्रथमंप्राक्यात्रायैदंडयात्रायैचोदयामास॥प्रभुमंत्रशक्तिसंपन्नस्यश ७
रत्स्वयंउत्साहमुत्पादयामासेत्यर्थः॥२४॥ ॥श्रीकृष्णः॥ ॥

तस्मा इति।।वाजिनामश्वानांनीराजनाविधौनीराजनाख्येशांतिकर्मणिसम्यक्विधिवद्धुतोहोमस
मिद्धोवह्निःप्रगतादक्षिणंप्रदक्षिणंतिष्ठद्गुप्रभृतित्वादव्ययीभावः।।प्रदक्षिणंयदर्चिःज्वालात
स्यव्याजेनहस्तेनेवतस्मैजयंददौ।।उक्तंमहायात्रायां।।इध्मःप्रदक्षिणगतोहुतभुक्नृपस्यधात्रींस
मुद्रवसनांवशगांकरोति।।इतिवाजिग्रहणंगजादीनामप्युपलक्षणं।।तेषामपिनीराजनाविधा

तस्मैसम्यक्हुतोवह्निर्वाजिनीराजनाविधौ।।प्रदक्षिणार्चिर्व्याजेनहस्तेनेवजयंददौ।।२५।।
सगुप्तमूलप्रत्यंतःशुद्धपार्ष्णिरयान्वितः।।षड्विधंबलमादायप्रतस्थेदिग्जिगीषया।।२६।।

नात्।।२५।।स इति।।गुप्तोमूलंस्वनिवासस्थानंप्रत्यंतःप्रांतदुर्गंचयेनसगुप्तमूलप्रत्यंतः।।शुद्ध
पार्ष्णिरुद्धपृष्ठशत्रुःसेनयारक्षितःपृष्ठदेशोवा।।अयान्वितःशुभदैवान्वितः।।अयःशुभा
वहोविधिर्विधिरित्यमरः।।सरघुःषड्विधंमौलभृत्यादिरूपंबलंसैन्यं।।मौलंभृत्यंसुहृत्श्रेणीद्विषदा
टविकंबलमितिकामंदकः।।आदायदिग्जिगीषयाजेतुमिच्छयाप्रतस्थे।।२६।। ।।

रघु॰टी॰
९

सर्विति॥ ॥सरघुःशक्तिमत्वात्समर्थत्वान्मरुपृष्ठानिनिर्जलस्थानानि॥समानामरुधन्वानावित्यमरः

॥उदंभांसिउद्धृतजलानिचकार॥नाव्याःनौभिस्तार्यानदीः॥नाव्यंत्रिलिंगंनौतार्येइत्यमरः॥नौव
योविषमूलेत्यादिनायत्प्रत्ययाः॥सुप्रतराःसुखेनतार्याश्चकारविपिनानिअरण्यानि॥अटव्यर-
ण्यंविपिनंकाननंगहनंवनमित्यमरः॥प्रकाशानिनिर्वृक्षाणिचकार॥तस्यागम्यंकिमपिनास्तीत्य

मरुपृष्ठान्युदंभांसिनाव्याःसुप्रतरानदीः॥विपिनानिप्रकाशानिशक्तिमत्वाच्चकारसः॥३१॥पु
रोगैःकलुषास्तस्यसहप्रस्थायिभिःकृशाः॥पश्चात्प्रयायिभिःपंकाश्चक्रिरेमार्गनिम्नगाः॥३२
ससेनांमहतींकर्षन्पूर्वसागरगामिनीं॥बभौहरजटाभ्रष्टांगंगामिवभगीरथः॥३३॥ ॥

र्थः॥ ॥सइति॥ ॥महतींसेनांपूर्वसागरगामिनींकर्षन्सरघुःहरस्यजटाभ्योभ्रष्टांगंगाकर्ष
न्सगरपुत्रार्थपिपूर्वसागरगामिनींभगीरथइवबभौ॥भगीरथोनामकश्चित्कपिलदग्धानांसागराणां
नप्तातत्पावनायहरकिरीटात्गंगांप्रवर्तयिताराजातत्संबंधात्गंगाभागीरथीतिगीयते॥३३॥ ॥

स्याजितेरिति॥ ॥फलं लानं ष्टस्यपक्षे पक्षेत्र सर्वत्र स्याजिते॥ त्यजेर्ण्यन्तात् द्विकर्मकात्प्रधाने कर्मणि क्त
॥ उत्खातैः स्वपदाच्च्यावितैरन्यत्रोत्पाटितैर्वक्रुधा नम्रैः रणे जितैरन्यत्र छिन्नैरपि ःपादपैरर्दितिनो गज
स्येव तस्य रघोर्मार्ग उल्वणः प्रकाशश्चासीत्॥ प्रकाशं प्रकटं स्पष्टमुल्वणं विद्याद् स्फुटमिति यादवः॥
३३॥ ॥पौरस्त्यानिति॥ ॥जयी जयनशीलः॥ जिदृक्षिविश्रीएवमेत्यादिना इनिप्रत्ययः॥ स रघुरेवं

त्याजितैः फलैरुत्खातैर्भग्नैश्च वक्रुधा नृपैः॥ तस्यासीदुल्वणो मार्गः पादपैरिव दन्तिनः॥ ३३॥ पौर
स्त्यानेवमाक्रामंस्तांस्तान् जनपदान् जयी॥ प्राप तालीवनश्याममुपकण्ठं महोदधेः॥ ३४॥ ॥

पुरोभवान् पौरस्त्यान् प्राच्यान्॥ दक्षिणापश्चात्पुरसस्त्यगिति त्यक् प्रत्ययः॥ तांस्तान् सर्वानित्यर्थः
॥ ॥वीप्सायां द्विरुक्तिः॥ जनपदान् देशानाक्रामत्॥ तालीवनैः श्याम महोदधेरुपकण्ठमन्
तिकं प्राप॥ ३४॥ ॥श्रीकृष्णपरमात्मने नमः॥ ॥श्री॥ ॥ ॥

अनम्राणामिति॥ ॥अनम्राणां कर्मणि षष्ठी॥ समुद्धर्तुरुन्मूलयितुस्तस्माद्रघोः सकाशात्॥नी
चार्थानांनयहेतुरितिअपादानात्पंचमी॥ सिंधुरयान्नदीवेगादिवनिम्नैः सुलभैः आश्रयैः सुष्ठा
द्यैः आत्मा आजनपदवंचनाः रक्षितं यमावक्षेते॥ वेतसी वेतनसंबंधिनी वृत्तिं प्रणतिमितित्यर्थः॥ आ
श्रित्यात्मा संरक्षितः॥ अत्र कौटिल्यं बलीयसाभियुक्तो दुर्बलः सर्वत्र अनुप्रणतो वेतसंधर्ममा

अनम्राणां समुद्धर्तुस्तस्मात् सिंधुरयादिव॥ आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीं॥ ३५
॥वंगानुत्खायतरसानेता नौसाधनोद्यतान्॥ निचखान जयस्तंभान्गंगास्रोतोंतरेषु सः॥ ३६॥

तिष्ठेत् इति॥ ३५॥ ॥वंगानिति॥ ॥नेता नायकः स रघुः नौभिः साधनैः उद्धतान् संनद्धान् वंगा
न्राज्ञः तरसा बलेन॥ तरसी बलरंहसी तिपादवः॥ उत्खाय उन्मूल्य गंगायाः स्रोतसां प्रवाहा
णां अंतरेषु द्वीपेषु जयस्तंभान् निचखान स्थापितवानित्यर्थः॥ ३६॥ ॥

आपादपद्म इति॥ ॥आपादपद्मं अंघ्रिपद्मपर्यंतं प्रणताः॥ अत एव उत्खाताः॥ पूर्वमुद्धृताः अपि
प्रतिरोपिताः पश्चात्स्थापिताः ते वंगाः कलमा इव शालिविशेषा इव॥ शालयः कलमाद्याश्च षष्टिका
द्याश्च पुंसीत्यमरः॥ निपि आपादपद्मं मूलपद्मपर्यंतं॥ पादो बुध्नतुरीयांशशैलप्रत्यंतपर्वते॥ इति

नयोरस्त्रष्ट विभूषाणां तेन केरलयोषितां॥ अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः॥३७॥ आपा
दपद्मप्रणताः कलमा इव ते रघुं॥ फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः॥३७॥ सतीर्त्वा क
पिशां सैन्यैर्बद्धद्विरदसेतुभिः॥ उत्कलादर्शितपथः कलिंगाभिमुखो ययौ॥३८॥ ॥

गा

विश्वः॥ उत्खात
प्रतिरोपिताः रघुं फलैर्धनैः अन्यत्र सस्यैः संवर्धयामासुः॥ फलं फलैर्धने बीजे निष्पत्तौ भोगलाभयोः
सस्ये इति केशवः॥३७॥ ॥स इति॥ ॥स रघुर्बद्धाः द्विरदा एव सेतवो यैस्तैः सैन्यैः कपिशां नाम नदीक
रमामीति केचित्पठंति तीर्त्वा उत्कलैः राजभिः दर्शितपथः॥ संदर्शितमार्गः सन् कलिंगाभिमुखो ययौ॥३८

सइति॥ ॥सरघुर्महेंद्रस्यकुलपर्वतविशेषस्य॥ महेंद्रोमलयःसह्यःशक्तिमानृक्षपर्वतः॥ विंध्यश्चपा
रियात्रश्चसप्तात्रकुलपर्वताइतिविष्णुपुराणात्॥ मूर्ध्नितीक्ष्णंदुःसहंप्रतापंयंतासारथिर्गंभीरवेदि
नोद्विपस्यगजविशेषस्यमूर्ध्नितीक्ष्णंनिशितंअंकुशमिवन्यवेशयत्निक्षिप्तवान्॥ त्वग्भेदात्शो
णितस्रावात्मांसस्यव्यथनादपि॥ आत्मानंयोनजानातिसस्यात्गंभीरवेदितिराजपुत्रीये चिरकाले

सप्रतापंमहेंद्रस्यमूर्ध्नितीक्ष्णंन्यवेशयेत्॥ अंकुशंद्विरदस्येवयंतागंभीरवेदिनः॥ ३९॥ प्रतिज
ग्राहकालिंगस्तमस्त्रैर्गजसाधनः॥ पक्षच्छेदोद्यतंशक्रंशिलावर्षीवपर्वतः॥ ४०॥ ॥ नयोवेत्तिशिक्षां

परिचितावपि॥ गंभीरवेदीविज्ञेयःसगजोगजवेदिभिरितिसृगवर्मीये॥ ३९॥ ॥प्रतीति॥ ॥गजसाध
नःसन्कालिंगःकलिंगानांराजा॥ घञ्जमगधकलिंगसूरसेमसादणित्यण्प्रत्ययः॥ अस्त्रैरायुधैस्तं
रघुंपक्षाणांछेदेउद्यतंउद्युक्तंशक्रंशिलावर्षीपर्वतइवप्रतिजग्राहअभियुक्तवान्॥ ४०॥ ॥

द्विषामिति॥ ॥काकुत्स्थो रघुः तत्र महेंद्राद्रौ द्विषां नाराचदुर्दिनं नाराचानां बाणविशेषाणां दुर्दिनं लक्ष
णया वर्षमुच्यते॥ विषह्य सहित्वा तं सेयथा शस्त्रं मंगलस्नात इव विजयमंगलार्थमभिषिक्तः स्व जय
श्रियं प्रपेदे प्राप॥ यत्तु सर्वौषधिस्नानं तन्मंगल्यमरोचकमिति यादवः॥ ४१॥ तांबूलिनामिति॥ ॥त

द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनं॥ सन्मंगलस्नात इव प्रतिपेदे जयश्रियं॥ ४०॥ वायव्यास्त्र
विनिर्धूतात्पक्षाद्विद्यान्महोदधे॥ गजानीकात्स कालिंगं तार्क्ष्यः सर्पमिवाददे॥ ४२॥ तांबूलिनां द
लैस्तत्र रचितापानभूमयः॥ नालिकेरासवं योधाः शात्रवं च पपुर्यशः॥ ४३॥ ॥

त्र महेंद्राद्रौ युध्यंते इति योधाः पचाद्यच्॥ रचिताः कल्पिताः आपानभूमयः पानयोग्यप्रदेशाः
ला यैस्ते तथोक्ताः संतः नालिकेरासवं नारीकेलमद्यं तांबूलीनां नागवल्लीनां दलैः पपुः॥ तत्र विजह्रुरि
त्यर्थः॥ शात्रवं यशश्च पपुर्जह्रुरित्यर्थः॥ ४२॥ ॥

गृहीतेति॥ ॥धर्मविजयीधर्मार्थेविजयशीलःसनृपःरघुःगृहीतश्चासौप्रतिमुक्तस्तस्यमहेंद्रनाथ
स्यकालिंगस्यश्रियंजहार॥धर्मार्थमितिभावः॥मेदिनींतुनजहार॥शरणागतवात्सल्यादितिभा
वः॥४३॥ ॥ततइति॥ ॥ततःआसौविजयानंतरफलवत्पूगमालिनाफलितक्रमुकश्रेणीमता

ग्रहीतप्रतिमुक्तस्यसधर्मविजयीनृपः॥श्रियंमहेंद्रनाथस्यजहार
नतुमेदिनीं॥४३॥ततोवेलातटेनैवफलवत्पूगमालिना॥अगस्त्या
चरितामाशामनाशास्यजयोययौ॥४४॥ ॥

॥त्रीत्यादित्वात्तसिः॥प्रत्ययः॥वेलायाःसमुद्रकूलस्यतटेनोपांत्येनैवागस्त्येनाचरितामाशांदक्षि
णांदिशंअनाशास्यजयः॥अयत्नसिद्धत्वादप्रार्थनीयजयःसनृपययौ॥अगस्त्योदक्षिणामाशामा
श्रित्यनभसिस्थितःवरुणस्यात्मजोयोगीविंध्यवातापिमर्दनइतिब्रह्मपुराणे॥४४॥ ॥

सइति॥ ॥सरघुर्गजानांदानेनमदेनसुगंधिनासुरभिगंधिना॥गंधस्येत्यादिनाइकारादेशःसमा
सांतः॥प्युपिगंधस्येत्वेतदेकांतग्रहणंकर्त्तव्यमिति॥नैसर्गिकगंधविवक्षयामेवइकारादेशस्तथा
पिनिरंकुशाःकवयः॥तथामाघकाव्ये॥ववुरयुक्छदगुच्छसुगंधयःसततगास्ततगाननिरोधि
नः॥नैषधेच॥अपांहितृप्तायनवारिधाराःस्वादुःसुगंधिःस्वदतेतुषारेति॥नकर्मधारयान्म

ससैन्यपरिभोगेनगजदानसुगंधिना॥कावेरींसरितांपत्युःशंकनीयामिवाकरोत्॥४५॥ ॥

त्वर्थीयइतिनिषेधादिनीप्रत्ययपक्षोपिनघन्यएव॥सेनायांसमवेताःसैन्याःसेनायांसमवेता
॥येसैन्यास्तेसैनिकाश्चतेइत्यमरः॥सेनायावेतिण्यप्रत्ययः॥सैन्यानांपरिभोगेनउपभोगेनका
वेरींनामसरितंसरितांपत्युःसमुद्रस्यशंकनीयामविश्वसनीयामिवाकरोत्॥संभोगलिंगदर्श
नाद्भर्तुरविश्वासोभवतीतिभावः॥४५॥ ॥ ॥ ॥

बलैरिति॥ विजिगीषोर्विजेतुमिच्छोर्गताध्वनस्तस्य रघोर्बलैः सैन्यैः॥ बलं शक्तिर्बलं सैन्यमित्यादवः॥ मरीचेषु मरीचवनेषु उद्भ्रान्ताः परिभ्रान्ताः हारीताः पक्षिविशेषा य्यासुताः॥ तेषां विशेषा हारीता मद्गुः कारंडवः प्लव इत्यमरः॥ मलयाद्रेरुपत्यका आसन्नभूमयः॥ उपत्यकाद्रेरासन्ना भूमिरित्यमरः॥ उपाधिभ्यां त्यकन्नित्यादिना त्यकन् प्रत्ययः॥ अध्युषिताः उपत्यकासूषितमित्यर्थः॥ उपा

बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः॥ मरिचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः॥४६॥ ससंजुरश्वक्षुण्णानामेलानामुत्पतिष्णवः॥ तुल्यगंधिषु मत्तेभकटेषु फलरेणवः॥४७॥ ॥

लध्याद्रुस्सइति कर्मत्वं॥४६॥ ॥ससंजुरिति॥ ॥अश्वैः क्षुण्णानामेलानामेलालतानां उत्पतिष्णवः उत्पतनशीलाः॥ अलंकृञित्यादिना इष्णुच् प्रत्ययः॥ फलरेणवः फलरजांसि॥ तुल्यगंधिषु समानगंधेषु॥ सर्वधनीति वर्द्गिनो बहुव्रीहिः॥ मत्तेभानां कटेषु गंडेषु ससंजुः सक्ताः॥ गजगंडः कटः स्त्रियामरः॥४७॥ ॥

भोगीति॥ चंदनानां चंदनद्रुमाणां भोगिवेष्टनमार्गेषु सर्पवेष्टनानां निम्नेषु समर्पितं संजितं त्रिपदीछिदां
पादशृंखलछेदकानां अपि त्रिपदी पादबंधनमिति यादवः॥ करिणां ग्रीवासु नवं ग्रैवेयकं च बंधनमिति॥ ग्री
वाभ्यो ऽण् चेत्यण् प्रत्ययः॥ नास्रंसत न स्रस्तं अवतृत। घुभ्यो लुङीति परस्मैपदं॥ पुषादित्वादङ् अन् निदित
मित्यादिना नकारलोपः॥४८॥ दिशीति॥ दक्षिणस्यां दिशि रवेरपि तेजो मंदायते मंदं भवति॥ लोहितादित्वा

भोगिवेष्टनमार्गेषु चंदनानां समर्पितं॥ नास्रंसत करिणां ग्रैवं त्रिपदीछे
दिनामपि॥४८॥ दिशि मंदायते तेजो दक्षिणस्यां रवेरपि॥ तस्यामेव
रघोः पांड्याः प्रतापं न विषेहिरे॥४९॥ ॥श्रीरामः॥ ॥

त् क्यष् प्रत्ययः॥ वा क्यष इत्यात्मनेपदं॥ दक्षिणायने तेजोमांद्यादिति भावः॥ तस्यामेव दिशि पांड्याः
पांडूनां जनपदानां राजानः पांड्याः॥ पांड्याः पांडोर्ड्यण् वक्तव्यः॥ रघोः प्रतापं न विषेहिरे न सोढवंतः
॥ सूर्यविजयिनोपि विजितवानिति नायकस्य महानुत्कर्षो गम्यते॥४९॥ ॥ ॥

ताम्रपर्णीति॥ निर्पाड्यः ताम्रपर्ण्या नद्या समेतस्य संगतस्य महोदधेः संबंधि संचितं मुक्तासारं मौतिकवरं॥ सा
रो बले स्थिरांशे न्याय्ये क्लीबं वरे त्रिष्वित्यमरः॥ स्वं स्वकीयं संचितं यशः इव तस्मै रघवे निपत्य प्रणिपत्य ददुः॥ य
शसः शुक्लत्वादुपमेयं ताम्रपर्णीसंगमे मौक्तिकोत्पत्तिरिति प्रसिद्धं॥ ५०॥ स इति॥ ॥असत्येति युग्ममेतत्॥
असत्यविक्रमः स रघुः तटेषु सानुषु आलीनचंदनौ व्याप्तचंदनौ स्तनपक्षे प्रांतेषु व्याप्तचंदनानुलेपौ तस्य दक्षि

ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः॥ ते निपत्य ददुस्तस्मै यशः स्वमिव संचितं॥ ५०॥ स निर्विश्य य
थाकामं तटेष्वालीनचंदनौ॥ स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ॥ ५१॥ असत्यविक्रमः सह्यं
दूरमुक्तमुदन्वता॥ नितंबमिव मेदिन्याः स्रस्तांशुकमलंघयत्॥ ५२॥ ॥

णस्या दिशस्तनाविव स्थितौ मलयदर्दुरौ नाम शैलौ यथाकामं यथेच्छं निर्विश्य उपभुज्य निर्वेशो भृतिभोग
योरित्यमरः॥ ५१॥ असत्येति॥ उदकानि अस्य संतीति उदन्वान् उदधिः॥ उदन्वानुदधौ चेति निपातः॥ उदन्व
ता दूरं निर्मुक्तं दूरतस्त्यक्तं॥ स्तोकांतिकदूरार्थकृच्छ्राणि क्तेनेति समासः॥ पंचम्याः स्तोकादिभ्य इत्यलुक्॥ स्रस्तांशु
कं मेदिन्या नितंबमिव स्थितं तं सह्यं सत्याद्रिमलंघयत् प्राप्तः अतिक्रांतो वा॥ ५२॥ ॥

संप्रतिप्रती विद्विशां अनियया विल्याहः ॥ तस्येति ॥ ॥ अपरांतानां पाश्चात्यानां जये उद्यतैरुद्युक्तैः ॥
अपरांतास्तु पाश्चात्यास्ते च सूर्पारकादयः इति यादवः ॥ विसर्पद्भिर्गच्छद्भिस्तस्य रघोरनीकैः सैन्यैः ॥ अ
नीकेतु रणे सैन्ये इति विश्वः ॥ अर्णवो रामस्य जामदग्न्यस्य अस्त्रैरुत्सारितो अपसारितोपि सह्यलग्न

तस्यानीकैर्विसर्पद्भिरपरांतजयोद्यतैः ॥ रामास्त्रोत्सारितोप्यासीत्स
ह्यालग्न इवार्णवः ॥५३॥ भयोत्सृष्टविभूषाणां तेन केरलयोषितां ॥
अलकेषु चमूरेणुश्चूर्णप्रतिनिधिकृतः ॥५४॥ ॥

इवासीना सैन्यं द्वितीयोर्णव इव दृश्यत इति भावः ॥५३॥ ॥ भयेति ॥ ॥ तेन रघुणा भयेन त्यक्ताः उत्सृष्टविभू
षाणां परिहृतभूषणानां केरलयोषितामलकेषु चमूरेणुः सेनारजः चूर्णस्य कुंकुमादिरजसः प्र
तिनिधिकृतः एतेन योषितां पलायनं चमूनां प्रसरं तु धावनं ध्वन्यते ॥ ॥५४॥ ॥

मरुलेति ॥ ॥मुरलानाम केरलदेशेषु काचिन्नदी ॥ मुरलीति केचित्पठंति ॥ तस्या मारुतेन उद्धूतं उत्थापितं केतकं केतकीसंबंधी रजः ॥ तद्योधवारबाणानां रघुभटकंचुकानां ॥ कंचुको वारबाणोऽस्त्री त्यमरः ॥ अयत्नपटवासतां अयत्नसिद्धवस्त्रवासनाद्रव्यत्वं अगमत् ॥ पिष्टातः पटवासकः इत्यमरः ॥ ॥५५॥ ॥अभ्यभूयतेति ॥ ॥चरतां गच्छतां वाजिनां वाहानां ॥ वाजिवाहार्वगंधर्वहयसैंधव

मरुलामारुतोद्धूतमगमत्केतकं रजः ॥ तद्योधवारबाणानामयत्नपटवासतां ॥५५॥ अभ्यभूयत वाहानां चरतां गात्रसिंजितैः ॥ वर्मभिः पवनोद्धूतराजतालीवनध्वनिः ॥५६॥ ॥ ॥

सप्तयः इत्यमरः ॥ गात्रसिंजितैः ॥ गात्रेषु शब्दायमानैः ॥ कर्त्तरि क्तः ॥ गं जितरिति पाठः ॥ सज्जतेर्ण्यंताल्कर्मणि क्तः ॥ वर्मभिः कवचैः पवनेनोद्धूतानां कंपितानां राजतालीवनानां ध्वनिरभ्यभूयत तिरस्कृतः ॥५६॥ ॥

खर्जूरीति ॥ ॥खर्जूरीणां तृणद्रुमविशेषाणां ॥ खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः इत्यमरः ॥ स्कं
धेषु प्रकांडेषु ॥ अस्त्री प्रकांडः स्कंधः स्यान्मूलाच्छाखावधेस्तरोरित्यमरः ॥ नद्धानां बद्धानां करिणां मदो
द्गारेण मदस्रावेण सुगंधिषु ॥ गंधस्येत्त्वादिना इकारः ॥ कटेषु गंडेषु पुंनागेभ्यः ॥ पुंनागपुष्पाणि विहा
यत्यपूर्वो पेर्पंचमी ॥ शिलीमुखाः अलयः पेतुः ॥ अलिबाणौ शिलीमुखावित्यमरः ॥ ततोपि सौर्गधाति

खर्जूरीस्कंधनद्धानां मदोद्गारसुगंधिषु ॥ कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥५७॥ अवका
शं किलोदन्वान्रामायाभ्यर्थितो ददौ ॥ अपरांतमहीपालव्याजेन रघवे करं ॥५८॥ ॥ शयादिति ना
वः ॥५७॥ अवकाश इति ॥ ॥उदन्वानुदधिः रामाय जामदग्न्याय अभ्यर्थितः याचितः सन्नवकाशं
स्थानं ददौ ॥ रघवे तु अपरांतमहीपालव्याजेन करं बलिं ददौ ॥ बलिहस्तांशवः कराः इत्यमरः ॥ अपरां
तानां समुद्रमध्यदेशवासिनां नृपैर्दत्ते करे समुद्रदत्तत्वोपचारः ॥ करदानं तु भीत्या न तु याच्ञेति रामाद्राघोरुत्कर्षः

मत्रेति॥ ॥तत्रसरघुर्मल्लानांइमानांरदनोत्कीर्णानिरदनक्षतान्येवां॥मावेक्तः॥व्यक्तानिस्फुटानिविक्रि
मलक्षणानिपराक्रमचिन्हानिविजयवर्णावलिस्थानानियस्मिन्तंतथोक्तं॥त्रिकूटमेवोच्चैर्जयस्तंभ
चकार॥गाढप्रकाराश्त्रिकूटाद्रिरेवोत्कीर्णवर्णस्तंभइवरघोर्जयस्यापकोभूदित्यर्थः॥५९॥पार

मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं॥त्रिकूटमेवतत्रोच्चैर्जयस्तंभंच
कारसः॥५९॥पारसीकांस्ततोजेतुंप्रतस्थेस्थलवर्त्मना॥इंद्रियाख्या
निवरिपूंस्तत्वज्ञानेनसंयमी॥६०॥ ॥

मीकानीति॥ ॥ततःसरघुःसंयमीयोगीतत्वज्ञा
नेनेंद्रियाख्यानिंद्रियनामकान्रिपून्इवपारसीकान्राज्ञोजेतुंस्थलवर्त्मनाप्रतस्थे॥नतुनेदिष्टेना
पिजलपथेनसमुद्रयानस्यनिषिद्धत्वात्इतिभावः॥६०॥ ॥

यवनीति॥ ॥सरघुःयवनीनांयवनस्त्रीणां॥जातेरस्त्रीविषयादितिङीष्॥मुखानीपद्मानीवमुखप
द्मानि॥उपमितसमासः॥तेषांमधुनामद्येनयोमदोमदरागः॥कार्यकारणतावयोरभेदेननिर्देशः॥
तंनसेहे॥कथमिवअकालेप्रावृड्व्यतिरिक्तकालेजलदोदयःप्रावृषिपद्मविकाशस्याप्रसक्तत्वादप

यवनीमुखपद्मानांसेहेमधुमदंनसः॥बालातपमिवाब्जानामकालजलदोदयः॥६१॥संग्राम
स्तुमुलस्तस्यपाश्चात्यैरश्वसाधनैः॥शार्ङ्गकूजितविज्ञेयप्रतियोधेरजस्यभूत्॥६२॥ ॥

जानांपीडाबंधिर्नबालातपमिवअब्जहितत्वादब्जसंबंधित्वंसौरातपस्य॥६१॥ ॥संग्रामइति॥ ॥तस्यरघो
रश्वसाधनैःपश्चाद्भवैःपाश्चात्यैर्यवनैःसह॥दक्षिणापश्चात्पुरसस्त्यक्॥सहार्थेतृतीया॥शृंगाणांवि
काराःशार्ङ्गाणिधनुषितेषांकूजितैः॥अथवाशार्ङ्गैःशृंगसंबंधिभिःकूजितैःविज्ञेयाःअनुमेयाः॥प्रतियो
धाःप्रतिभटाः॥यस्मिन्तस्मिन्रजसितुमुलःसंग्रामःसंकुलंयुधमभूत्॥तुमुलंरणसंकुलमितिविश्वः६२

भल्लेति ॥ स रघुः भल्लापवर्जितैर्बाणविशेषकृत्तैः ॥ स्नुहीदलफलो भल्ल इति यादवः ॥ श्मश्रुलैः प्रवृद्धमुखरोमवद्भिः ॥ सिध्मादित्वाल्लच् प्रत्ययः ॥ तेषां पाश्चात्यानां शिरोभिः सरघाभिर्मधुमक्षिकाभिर्व्याप्तैः ॥ सरघा मधुमक्षिकेत्यमरः ॥ क्षुद्राः सरघाः क्षुद्राख्यं गा नदी वेच्या सरघा केटकारिकेत्यमरः ॥ आप्तैः ॥ क्षुद्राभिः कृतानि क्षौद्राणि मधूनि ॥ क्षौद्रं मधु नीपानीये इत्यमरः ॥ क्षुद्राभ्रमरवटरपादपादञ्

भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीं ॥ तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ६३ ॥ अप
नीतशिरस्त्राणाः शेषास्तं शरणं ययुः ॥ प्रणिपातप्रतीकारः संरंभो हि महात्मनां ॥ ६४ ॥ ॥

ति संज्ञायामञ् प्रत्ययः ॥ तेषां पटलैस्तबकैरिव महीं तस्तार छादयामास ॥ ६३ ॥ अपनीतेति ॥ शेषाः हतावशिष्टाः अपनीतशिरस्त्राणाः अपसारितशीर्षण्याः संतः शरणागतलक्षणमेतत् ॥ तं रघुं शरणं ययुः ॥ तथा हि ॥ महात्मनां संरंभः संक्षोभः प्रणिपातः प्रणतिरेव प्रतीकारो यस्य स हि महतां परकीयप्रोधत्यमेवासह्यं न तु जीवितमिति भावः ॥ ६४ ॥ ॥

विनयंतइति॥ ॥तस्यरघोर्योधाःनद्यःआस्तीर्णान्यजिनरत्नानिचर्मश्रेष्ठानियासुतासुद्राक्षावल्ल
यानांभूमिषु॥मृद्वीकागोस्तनीद्राक्षास्वाद्वीमधुरसेतिचेत्यमरः॥मधुभिर्द्राक्षाफलप्रकृतिकैर्मद्यैःवि
जयश्रमंयुधखेदंविनयंतेस्मअपनीतवंतः॥कर्तृस्थेचाशरीरेकर्मण्यात्मनेपदं॥लट्स्मइतिभूतार्थेल

विनयंतेस्मतद्योधामधुभिर्विजयश्रमं॥आस्तीर्णाजिनरत्नासुद्राक्षावलयभूमिषु॥६५॥ततःप्रत
स्थेकौबेरींभास्वानिवरघुर्दिशं॥शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव॥६६॥जितानजय्यस्ता
नेवक्तारथपुरःसरान्॥महार्णवमिवोर्वाग्निःप्रविवेशोत्तरापथं॥६६॥॥ २॥६५॥ततइति॥त

तोरघुर्भास्वान्सूर्यइवशरैर्बाणैःउस्रैः॥किरणैरिव॥किरणोस्रमयूखांशुगभस्तिघृणिरश्मयइत्य
मरः॥उदीच्यानुदग्भवान्नृपान्रसानुदकानीवोद्धरिष्यन्कौबेरींकुबेरसंबंधिनींदिशमुदीचींप्र
तस्थे॥अनेकेवशब्देनेयमुपमायथाहदंडी॥एकानेकेवशब्दत्वात्सावाक्योपमाद्विधेति॥६६॥ ॥

विनीतेति॥ सिंधुर्नाम काश्मीरदेशेषु कश्चिन्नदीविशेषः॥ देशेनदविशेषेब्धौ सिंधुर्नासरितःस्त्रियामित्यमरः॥ सिंधोस्तीरे विवेष्टनैरंगपरिवर्त्तनैर्विनीताध्वश्रमास्तस्य रघोर्वाजिनोअश्वाः लग्नाः कुंकुमकेसराः कुंकुमकुसुमकिंजल्का येषां तान्॥ यद्वा॥ लग्नकुंकुमकेसराःसटाः येषां तान् स्कंधान् दुधुवुःकंपयंतिस्म॥ ६७॥ तत्रेति॥ तत्रोदीच्यां दिशि नर्तेषु व्यक्तविक्रमं नर्तवधेनस्फुटपराक्रममित्यर्थः

विनीताध्वश्रमास्तस्यसिंधोस्तीरेविचेष्टनैः॥ दुधुवुर्वाजिनःस्कंधाल्लग्नकुंकुमकेसरान्॥ ६७॥
तत्रहूणावरोधानांभर्तृषुव्यक्तविक्रमं॥ कपोलपाटनादेशिबभूवरघुचेष्टितं॥ ६८॥ ॥ ॥

रघुचेष्टितं रघुव्यापारः हूणाः जनपदाः क्षत्रियाः तेषामवरोधाः अंतःपुरस्त्रियः तेषां कपोलेषु पाटलस्य पाटलिम्नः ताडनादिकृतारुण्यस्य आदेशि उपदेशिकं बभूव॥ अथवा पाटल आदेशी आदिष्टा यस्य तद्बभूव॥ स्वयं लेखव्याप्यत इत्यर्थः॥ ६८॥ ॥

कांबोजा इति॥ कांबोजा राजनः समरे तस्य रघोर्वीर्यं सोढुमनीश्वराः अशक्ताः संतः गजानामालानं बंध
नं॥ आवेष्टुटिविनाषाद्धीयतेरीत्यालं॥ तेन परिक्लिष्टैः परिक्षतैरंकोटैर्हक्षविशेषैः सार्धमानताः॥ ६९
॥ तेषामिति॥ तेषां कांबोजानां सद्भिरश्वैः भूयिष्ठास्तुंगाः द्रविणानां हिरण्यानां॥ हिरण्यं द्रविणं द्युम्नमि

कांबोजाः समरे सोढुं तस्य वीर्यमनीश्वराः॥ गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः॥ ६९॥ तेषां
सदश्वभूयिष्ठास्तुंगद्रविणराशयः॥ उपदा विविशुः शश्वन्नोत्सेकः कोशलेश्वरं॥ ७०॥ ॥

त्यमरः॥ राशय एवोपदाः उपायनानि॥ उपायनमुपग्राह्यमुपहारं तथोपदेत्यमरः॥ कोशलेश्वरं तं रघु
शश्वत् असकृत् विविशुः॥ मुहुर्मुहुः पुनः शश्वदभीक्ष्णमसकृत्समा इत्यमरः॥ उत्सेकागर्वास्तु न विवि
शुः॥ सत्यपि गर्वकारणे न जगर्वेत्यर्थः॥ ७०॥ ॥ ॥

ततइति॥ततोनंतरंअश्वसाधानःसनूगौर्याःगुरुंपितरंशैलंहिमवंतंउधतैरश्वखुरोधूतैर्धातूनांगैरि
कादीनांरेणुभिस्तत्कुटानूतस्यशृंगाणि॥कूटोस्त्रीशिखरंशृंगमित्यमरः॥वर्धयन्निवआरुरोह॥उत्थ
तधूलिदर्शनाच्छिरिशिखरवृद्धिबुद्धिभ्रमोजायतेइतिभावः॥७१॥शशंसेति॥तुल्यसत्वानांसैन्यैःसमा
नबलानांगुहासुशेरतेइतिगुहाशयाः॥अधिकरणेशेतेरित्यच्प्रत्ययः॥तेषांसिंहानांसंबंधिपरिवृत्यपरा

ततोगौरीगुरुंशैलमारुरोहाश्वसाधनः॥वर्धयन्निवतत्कुटानुधूतैर्धातुरेणुभिः॥७१॥शशंसतु
ल्यसत्वानांसैन्यघोषेप्यसंभ्रमं॥गुहाशयानांसत्वानांपरिवृत्याविलोकितं॥७२॥ ॥

वृत्याव॥लोकितंशायित्वैवग्रीवाभंगेनावलोकनंकर्तृसैन्यघोषेसेनाकलकलेसंभ्रमकारणेसत्यपि
॥असंभ्रमंअंतःक्षोभविरहं॥नञः प्रसज्यप्रतिषेधेपिसमासइष्यते॥शशंसकथयामास॥सैन्येन
इत्यर्थाच्छिन्न्यतेबाह्यचेष्टितमेवमनोवृत्तेरनुमापकमितिभावः॥असंभ्रमत्वेहेतुः॥तुल्यसत्वानामिति
नहिसमबलःसमबलाद्बिभेतीतिभावः॥७२॥ ॥

भूर्जेष्विति॥ ॥भूर्जेषु भूर्जपत्रेषु॥ भूर्जपत्रो भुजो भूर्जो मृदुत्वक्चर्मिकामतेतियादवः॥ मर्मरः शुष्कपर्ण
ध्वनिः॥ मर्मरः शुष्कपर्णानामितियादवः॥ अयं च शुक्लादिशब्दवद्गुणिन्यपि वर्त्तते प्रयोज्यते च॥ मर्मरेरशु
रुक्षपर्णध्वनिरिति॥ अतो मर्मरीभूताः मर्मरशब्दवंतो भूता इत्यर्थः॥ कीचकानां वेणुविशेषाणां ध्वनिहे
तवः॥ श्रोत्रसुखावहाश्चेतिभावः॥ गंगासीकरिणः शीतला इत्यर्थः॥ मरुतो वाताः मार्गे तं सिषेविरे॥ ७३

भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः॥ गंगासीकरिणो मार्गे मरुतस्तं सिषेविरे॥ ७३॥ विशश्रमुर्न
मेरूणां छायास्वध्यास्य सैनिकाः॥ दृषदो वासितोत्संगा निषण्णमृगनाभिभिः॥ ७४॥ ॥

विशश्रमुरिति॥ ॥सैनिकाः सेनायां समवेताः॥ प्राग्वहतीयष्ठक्॥ प्रत्ययः॥ नमेरूणां सुरपुन्नागा
नां छायासु निषण्णानां दृषदुपविष्टानां कस्तूरीमृगाणां नाभिभिर्वासितोत्संगाः सुरभिततलाः दृषदः शि
लाः अध्यास्याधिष्ठाय विविशुर्विश्रांताः॥ ७४॥ ॥श्री॥ ॥ ॥

सरलेति॥ ॥सरलेषुदेवदारुविशेषेषुआसक्तानियानिमातंगानांगजानांग्रीवाणिग्रैवेयाणिकंठभूषणा
नि॥ग्रीवाभ्योण्चेतिचकारात्ढञ्प्रत्ययः॥तेषुस्फुरितत्विषः प्रतिफलितभासः ओषधयः नक्तंज्वलतीलता
विशेषाः॥नेतुर्नायकस्यरघोस्नेहदीपिकाः॥तैलनिरपेक्षाः प्रदीपाः आसन्॥१५॥तस्येति॥तस्यर

सरलासक्तमातंगग्रैवेयस्फुरितत्विषः॥आसन्नोषधयोनेतुर्नक्तमस्नेहदीपिकाः॥१५॥तस्योत्सृ
ष्टनिवासेषुकंठरज्जुक्षतत्वचः॥गजवर्ष्मकिरातेभ्यःशशंसुर्देवदारवः॥१६॥ ॥

घोरुत्सृष्टेषुउज्झितेषुनिवासेषुसेनानिवेशेषुकंठरज्जुनिर्गजग्रैवेयैःक्षताःनिष्पिष्टाःत्वचोतेषांतेदेवदार
वःकिरातेभ्योवनचरेभ्योगजानांवर्ष्मप्रमाणं॥वर्ष्मदेहप्रमाणयोरित्यमरः॥शशंसुःकथितवंतः॥देव
दारुस्कंधत्वक्क्षतैर्गजानामौन्नत्यंअनुमीयतइत्यर्थः॥१६॥ ॥

तत्रेति॥तत्रहेमाद्रौरघोःपर्वतेभवैःपार्वतीयैः॥पर्वतात्वछ्इतिछप्रत्ययः॥गणैरुत्सवसंकेताख्यैः
सप्तभिःसह॥गणानुत्सवसंकेतानजयत्॥सप्तपांडवइतिमहाभारते॥नाराचानांबाणविशेषाणांक्षेप
णीयानांभिंडिपालानांअश्मनांचनिष्पेषेणसंघर्षेणउत्पतिताअनलायस्मिन्तथोक्तं॥क्षेपणीयोभिंडि
पालोस्त्रगौंदीर्घोमिहाफलइतियादवः॥घोरंभीमंजन्ययुधंअभूत्॥युद्धमायोधनंजन्यमित्यमरः॥७७

तत्रजन्यंरघोर्घोरंपार्वतीयैर्गणैरभूत्॥नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं॥७७॥शरै
रुत्सवसंकेतान्सकृत्वाविरतोत्सवान्॥जयोदाहरणंबाह्वोर्गापयामासकिंनरान्॥७८॥पर
स्परस्यविज्ञातस्तेषुपायनपाणिषु॥ ॥

॥शरैरिति॥सरघुःशरैर्बाणैःउत्सवसंकेतान्नामगणा
न्विरतोत्सवान्कृत्वाजित्वैवंथत्वेत्यर्थः॥किंनरान्बाह्वोःस्वभुज॥योर्जयोदाहरणेजयस्यख्याप
कंभत्रबोधविशेषंगापयामास॥गतिबुधीत्यादिनाकिंनराणांकर्मत्वं॥७८॥परस्परेणेति॥ ॥तेषु
गणेषुउपायनयुक्ताः॥पाणयोयेषांतेषुसत्सुपरस्परेणान्योन्यंराज्ञिहिमवतःसारोधनरूपोविज्ञातः॥

हिमाद्रिणाराज्ञःसारोबलरूपोविज्ञातः॥एतेनतत्रत्यवस्तूनामनर्घ्यत्वंगणानामभूतपूर्वःपराज
यइतिध्वन्यते॥७९॥तत्रेति॥सरघुःतत्रहिमाद्रौअक्षोभ्यमप्रधृष्यंयशोराशिंनिवेश्यनिधायपो
लस्त्येनरावणेनतुलितस्यचालितस्यअद्रेःकैलासस्यह्रियमादधानोजपन्निवारूरोहअवततार

राज्ञाहिमवतःसारोराज्ञःसारोहिमाद्रिणा॥७९॥तत्राक्षोभ्यंयशोराशिंनिवेश्यावरुरोहसः
॥पौलस्त्यतुलितस्याद्रेरादधानइवह्रियं॥८०॥चकंपेतीर्णलौहित्येतस्मिन्प्राग्ज्योतिषेश्व
रः॥तद्गजालानतांप्राप्तैःसहकालागरुद्रुमैः॥८१॥ ॥

॥कैलासमगत्वैवप्रतिनिवृत्तइत्यर्थः॥

नहिशूराःपरेणपराजितंअभियुंजतेइतिभावः॥८०॥चकंपेति॥तस्मिन्रघौतीर्णलौहित्यानामन
दीयेनतस्मिन्तीर्णलौहित्येसतिप्राग्ज्योतिषाणांजनपदानांईश्वरः॥तस्यरघोर्गजानामालानतां
प्राप्तैःकालागरुद्रुमैःकृष्णागरुवृक्षैःसहचकंपेकंपितवान्॥८१॥ ॥

नेति ॥ सप्राग्ज्योतिषेश्वरः ॥ रुद्धार्कमातपत्रसमूहं अधारावर्षं च ततदुर्दिनं च धारावृष्टिं विना दुर्दिनीकृ
ते अस्य रघोः रथवर्त्मरजोपि न प्रसेहे ॥ पाताकिनीकृत एव प्रसेहे न कृतोपीत्यर्थः ॥ ८२ ॥ तमिति ॥
कामरूपाणां नाम देशानां प्रभुः ॥ अत्याखंडलविक्रमम् अतीन्द्रपराक्रमं तं रघुं भिन्नाः स्रवन्मदाः कटाः

न प्रसेहे सरुद्धार्कमधारावर्षदुर्दिनं ॥ रथवर्त्मरजोप्यस्य कुत एव पताकिनीं ॥ ८२ ॥ तमी
शः कामरूपाणामत्याखंडलविक्रमं ॥ भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥ ८३ ॥ ॥

गंडाः येषां तैर्नागैः गजैः साधनैर्भेजे ॥ नागान् दत्वा शरणं गत इत्यर्थः ॥ कीदृशैर्नागैः यैर्नागै
रन्यान् रघुव्यतिरिक्तान् नृपानुपरुरोध ॥ शूराणामपि शूरो रघुरिति भावः ॥ ८३ ॥ ॥ ॥

कामरूपेति॥कामरूपेश्वरोहेमपीठस्यापिदेवतांतस्यरघोःपादयोःछायांकनमयपादपीठव्यापि
नींकांतिरत्नान्येवपुष्पाणितेषामुपहारेणसमर्पणेनानर्च अर्चयामास॥८४॥इतीति॥जिष्णुःज
यनशीलः॥ग्लाजिस्थश्चग्स्नुरितिग्स्नुप्रत्ययः॥सरघुःइतीत्थंदिशोजितारंतेरुद्धतंरजःछत्रशून्ये
षुरघोरेकछत्रकत्वाद्दितिभावः॥राज्ञांमौलिषुविश्रमयत्संक्रामयन्नित्यर्थः॥न्यवर्त्ततनिवृत्तः

कामरूपेश्वरस्तस्यहेमपीठाधिदेवतां॥रत्नपुष्पोपहारेणछायामानर्चपादयोः॥८४॥इति
जित्वादिशोजिष्णुर्न्यवर्त्ततरथोद्धतं॥रजोविश्रमयन्राज्ञांछत्रशून्येषुमौलिषु॥८५॥सविश्व
जितमाजह्नेयज्ञंसर्वस्वदक्षिणं॥आदानंहिविसर्गायसतांवारिमुचामिव॥८६॥ ॥

॥८५॥सइति॥सरघुःसर्वस्वंदक्षिणायस्यतंसर्वस्वदक्षिणं॥विश्वजित्सर्वस्वदक्षिणइतिश्रुतेः॥वि
श्वजितंनामयज्ञंआजह्रेकृतवानित्यर्थः॥युक्तंचैतदित्याह॥सतांसाधूनांवारिमुचांमेघानामिवआ
दानमर्जनंविसर्गायहित्यागाय॥पात्रविनियोगायेत्यर्थः॥८६॥ ॥श्रीरामः॥ ॥

सत्रांत इति॥ काकुत्स्थो रघुः सत्रांते यज्ञांते॥ सत्रमाच्छादने यज्ञे सदादाने धनेपि चेति विश्वः॥ सचि
वानां सखा सचिवसखः सन् तेषामात्यंतानुसरणद्योतनार्थं राज्ञः सचिवत्वव्यपदेशः॥ राजाहःस
खिभ्यष्टच्॥ गुर्वीभिर्महतीभिः पुरस्क्रियाभिः पूजाभिः शमितं पराजयेन व्यलीकं दुःखं वैलक्ष्यं

सत्रांते सचिवसखः पुरस्क्रियाभिर्गुर्वीभिः शमितपराजयव्यलीकान्॥ काकुत्स्थश्चिर
विरहोत्सुकावरोधान्राजन्यान्स्वपुरनिवर्त्तयेनुमेने॥८७॥ ॥

येषां तान्॥ दुःखे वैलक्ष्ये व्यलीकमिति यादवः॥ चिरविरहेणोत्कंठिताः उत्सुकाः अवरोधाः
अंतःपुरांगना येषां तान्॥ राज्ञोऽपत्यानि राजन्याः क्षत्रियास्तान्॥ राजश्वसुराद्यदिति जातौ यत्प्र
त्ययः॥ मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराडित्यमरः॥ स्वपुरं प्रति निवृत्तये प्रतिगमनाय

नुमुनेरनुज्ञातवान्॥८७॥तइति॥तेराजानःरेखाचध्वजांकुशकुलिशानिचातपत्राणिच॥ध्वजाद्याका
रेरेखाइत्यर्थः॥तानिचिह्नानियस्मिंस्तथोक्तं॥प्रसादेनैवलभ्यंप्रसादलभ्यं॥सम्राजःसार्वभौमस्यर

नेरेखाध्वजकुलिशातपत्रचिह्नंसम्राजश्चरणयुगंप्रसादलभ्यं॥प्रस्थानप्रणतिभिरंगुली
षुचक्रुर्मौलिस्रक्च्युतमकरंदरेणुगौरं॥८८॥ ॥

घोःचरणयुगंप्रस्थानेप्रयाणसमयेयाःप्र
णतयोनमस्काराःताभिःअंगुलीषुमौलिषुकेशबंधेषुयाःस्रजःमाल्यानिताभ्यश्च्युतैर्मकरंदैःपु
ष्परसैःरेणुभिःपरागैश्चगौरंगौरवर्णंचक्रुः॥८८॥ ॥श्री॥ ॥

॥ ॥इतिश्रीमहोपाध्यायकोलचलमल्लिनाथविरचितायांरघुवंशसमाख्यायांसंजीविन्यांचतु

इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौरघु
दिग्विजयोनामचतुर्थःसर्गः॥४॥ ॥श्री॥ ॥

र्थःसर्गःसमाप्तः॥४॥ ॥श्रीसांबशिवरामेश्वरायनमः॥ ॥श्री॥ ॥छ॥ ॥ ॥

॥चतुर्थसर्गसमाप्तः॥४॥

॥ अथरघुवंशपंचमसर्गप्रारंभः॥ छं छ

रघुवं·टी·
१

॥श्रीगणेशाय नमः॥ ॥इंदीवरदलश्याममिंदिरानंदकंदलं॥ वंदारुजनमंदारं वंदेहं यदुनंदनं॥१॥

तमिति॥ ॥विश्वजिति विश्वजिन्नाम्नि यज्ञेऽध्वरे॥ यज्ञः सवोऽध्वरो याग इत्यमरः॥ निःशेषं विश्राणितं दत्तं॥ श्रणु दाने चुरादिः॥ कोशानामर्थराशीनां जातं समूहो येन तं तथोक्तं॥ कोशोऽस्त्री कुड्मले दिव्येऽसि खेऽर्थे सिगृहे तन्नाविति यादवः॥ जातं जन्मिसमूहयोरिति विश्वः॥ एतेन कौत्सस्यानवसरप्राप्तिं सू

॥तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातं॥
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतंतुशिष्यः॥१॥

चयति॥ तं क्षितीशं रघुमुपात्तविद्यो वरतंतोः शिष्यः कौत्सः ऋष्यंधकेत्यण्लोपवादः॥ गुरुदक्षिणार्थी पुष्पवादिभ्यो देशे इत्यर्थाच्चसंनिहितान्नदंताच्चेति इतिः॥ अप्राप्त्याख्येय इति भावः॥ प्रपेदे प्राप॥ सर्गेऽस्मिन्वृत्तमुपजातिः॥ लक्षणं तु॥ स्यादिंद्रवज्रा यदि तौ जगौ गः उपेंद्रवज्रा जतजास्ततो गौ॥ अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः इति लक्षणात्॥१॥ ॥

सर्गः ५

१

सरति॥ ॥अनर्घ्यशीलः अमूल्यस्वभावः॥ असाधारणस्वभाव इत्यर्थः॥ मूल्ये पूजाविधावर्घ्यः॥ शीलं स्व
भावे सद्वृत्ते इत्यमरश्चैतौ॥ यशसा कीर्त्या प्रकाश इति प्रकाशः॥ पचाद्यच्॥ अतिथिषु साधुरातिथेयः
॥पथ्यतिथिवसतिस्वपतेर्ढञ् इति ढञ् प्रत्ययः॥ स रघुः हिरण्मयविकारो हिरण्मयं॥ दाण्डिनायनादिसूत्रेण नि

स मृण्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घ्यशीलः॥ श्रुतप्रकाशं यशसा प्रकाशः
प्रत्युज्जगामातिथिमातिथेयः॥२॥ ॥

पातः॥ वीतहिरण्मयत्वादपगतसुवर्णपात्रत्वात्।
सर्वस्वदक्षिणत्वादिति भावः॥ मृण्मये मृद्विकारे पात्रे अर्घ्यमर्घार्थमिदं॥ पादार्घाभ्यां चेति य
त्प्रत्ययः॥ पूजार्थं द्रव्यं निधाय श्रुतेन शास्त्रेण प्रकाशं प्रसिद्धं॥ श्रुतं शास्त्रावधृतयोरित्यमरः॥
अतिथिमभ्यागतं कौत्सं अतिथिर्ना गृहागते इत्यमरः॥ प्रत्युज्जगाम॥२॥ ॥ब्रू॥ ॥ ॥

तमिति॥ ॥विधिज्ञः शास्त्रज्ञः॥ अकरणे प्रत्यवायभीरुरित्यर्थः॥ मानधनानां अग्रयायी अग्रेसरः॥
अपयशोभीरुरित्यर्थः॥ कृत्यवित् कार्यज्ञः॥ आगमनप्रयोजनमवश्यं द्रष्टव्यमिति कृत्यवित्॥ व
विशांपतिर्मनुजेश्वरः॥ द्वौ विशौ वैश्यमनुजावित्यमरः॥ विष्टरभाजं आसनगतमुपविष्टमित्य

तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी॥ वि
शांपतिर्विष्टरभाजमारात्कृताञ्जलिः कृत्यविदित्युवाच॥३॥

र्थः॥ विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनमित्यमरः॥ वृक्षासनयोर्विष्टर इति निपातः॥
तं तपोधनं विधिवत् विध्यर्हं। यथाशास्त्रमित्यर्थः॥ तदर्हमिति वतिप्रत्ययः॥ अर्चयित्वा आ
रात्समीपे आराद्दूरसमीपयोरित्यमरः॥ कृताञ्जलिः सन् वक्ष्यमाणप्रकारेण उवाच॥३॥ ॥

इति

६ मिश्रो ध्यार स्मैः ८

अप्यग्रणीरिति ॥ हे कुशाग्रबुद्धे सूक्ष्मबुद्धे ॥ कुशाग्रीयमतिः प्रोक्तः सूक्ष्मदर्शी च यः पुमानिति हलायु
धः ॥ मंत्रकृतां मंत्रद्रष्टॄणां ॥ सुकर्ममंत्रपापेत्यादिना क्विप् ॥ ऋषीणामग्रणीः श्रेष्ठः ते तव गुरुः कुशल्य
पि क्षेमवान् किं ॥ अपि प्रश्ने ॥ गर्हासमुच्चयप्रश्नशंकासंभावनास्वपीत्यमरः ॥ यतो यस्मात् गुरोः त्वया
त्रोपदेशात् ज्ञानं लोके न उष्णरश्मेः सूर्यात् चैतन्यं प्रबोध इवाप्तं स्वीकृतं ॥ ४ ॥ कायेनेति ॥ कायेन उपवासा

अप्यग्रणीर्मंत्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ॥ यतस्त्वया ज्ञानमशेषमाप्तं चैत लोकेन
न्यमिवोष्णरश्मेः ॥ ४ ॥ कायेन वाचा मनसा च शश्वद्यदर्जितं धैर्यविलोपितं तं ॥

दिकृच्छ्रचान्द्रायणादिना ॥ वाचा वेदपाठेन ॥ मनसा गायत्रीजपादिनापि करणेन वासवस्ये
ति
न्द्रस्य धैर्यं लुम्पतीति वासवधैर्यलोपि ॥ स्वपदापहारशंकाजनकमित्यर्थः ॥ यत्तपः शश्वत्सदा संभृ
तं ॥ सुकृतं पुनः शश्वदभीक्ष्णमसकृत्समा इत्यमरः ॥ ॥

४ संभृतं वासवधैर्यलोपि ४

+३ प्रयत्नैः उपचारैः सुत निर्विशेषं पुत्रसामान्यं यथास्यात्तथा सम्यग्वर्धितानां आश्रम छिद्रां दुरव निवर्तकानां यः युष्माकं ३

संवर्धितं संचितं ॥ महर्षेर्वरतंतोस्त्रिविधं वाङ्मनःकायजं तत्तपः श्रंतरायैर्विघ्नैः इंद्रप्रेरिताप्सरःप्रभृतिभिर्न उपेय यैर्नाशं नापाद्यते कच्चित् ॥ न नीयते किं ॥ कच्चित् कामप्रवेदने इत्यमरः ॥ ५ ॥ आधारेति ॥ आधारबं धप्रमुखैरालवालनिर्माणादिभिः ॥ आधारस्त्वालवाले स्यादधिकरणेपि वेति यादवः ॥ आश्र मपादपानां वाद्यादिराहिश्रमहात् तद्वावनत्वात्‌रूपल्लवो बाधकं न कच्चिन्नास्ति किं ॥ ६ ॥ क्रियेति ॥ आपाद्यते न व्ययमंतरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत् ॥ ५ ॥ आधारबंधप्रमुखैः प्रयत्नैः संव र्धितानां सुतनिर्विशेषं ॥ कच्चिन्न वाय्वादिरुपप्लवो वा श्रमच्छिदामाश्रमपादपानां ॥ ६ ॥ क्रि यानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु ॥ तदंकशय्याच्युतनाभिनाला क च्चिन्मृगीणामनघा प्रसूतिः ॥ ७ ॥ क्रियानिमित्तेष्वपि कुशेषु मुनिभिः वत्सलत्वान्मृगस्नेहात् अ

छाते

भग्नकामा अप्रतिहतैषां मुनीनां अंकाएव शय्यास्तासु च्युतानि नाभिनालानि यस्याः सा तथो क्ता ॥ मृगीणां प्रसूतिः संततिरनघा अव्यसना कच्चित् अनपायिनी किमित्यर्थः दुःखिनो व्यसने

वत्कमिति स्यादवुः ॥ तेहि व्याक्तं नयाहृस्गरात्रं
स्त्रं कएवधा र्यंतिः ॥ ७ ॥

निर्वर्त्यते इति॥ यैस्तीर्थजलैर्नियमाभिषेको नित्यस्नानादि निर्वर्त्यते निःपाद्यते॥ येभ्यो जलेभ्य उद्धृत्ये जलानि
ति शेषः॥ पितॄणामग्निष्वात्तादीनां निवापाञ्जलयस्तर्पणाञ्जलयः॥ पितृदानं निवापः स्यादित्य
मरः॥ निर्वर्त्यन्ते उञ्छानां प्रकीर्णधान्यानां षष्ठैः षष्ठभागैः पालकत्वात् राजग्राह्यैरंकिता
नि सैकतानि पुलिनानि येषां तानि तथोक्तानि वो युष्माकं तानि तीर्थजलानि शिवानि नद्रा

निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितॄणां॥
तान्युञ्छषष्ठांकितसैकतानि शिवानि वस्तीर्थजलानि कच्चित्॥८॥

णि कच्चित्॥ अनुपद्रवानि किमित्यर्थः॥ उञ्छो धान्यांशआदानं कणिशाद्यर्जनं शिलमिति या
दवः॥ षष्ठाष्टमाभ्यां ञ च इति षष्ठशब्दाद्भागार्थे ञप्रत्ययः॥ अत एव ह्यरण्यार्थत्वात् सूत्रेण गुणेत्या
दिना न षष्ठीसमासे प्रतिषेधः॥ सिकताः एषु सन्तीति सैकतानि सिकताशर्कराभ्यां च इत्यण्प्रत्यय
॥८॥

नीवारेति॥ ॥काले(ल्ले)षुयोग्यकाले(ल्ले)षुउपपन्नानामागतानाम तिथीनां कल्प्याः कल्पिताः नागाः यस्य तत्तथोक्तं वनेनवं वन्यं शरीरस्थितेः जीवनस्य साधनं वो युष्माकं पच्यते इति पाकः फलं धान्यमिति यावत्॥ नीवारपाकादि आदिशब्दात् श्यामाकादि धान्यसंग्रहः॥ जनपदे भवा आगतेर्जानपदैः॥ सं

नीवारपाकादि कडंगरीयैराभृश्यते जानपदैर्न कच्चित्॥ काले(ल्ले)पपन्नातिथिकल्प्यभागं वन्यं शरीरस्थितिसाधनं वः॥ ९॥

ततश्चागतइत्यण्प्रत्ययः॥ कडंगरीयैः कडंगरं बुसं अर्हंतीति कडंगरीयाः कडंगरो बुसं क्लीबे धान्यत्वचि तुषः पुमानित्यमरः॥ कडंगरदक्षिणाछ च इति छप्रत्ययः॥ तैर्गोमहिष्यादिभिर्नाभृश्यते कच्चित् न नश्यते किं॥ ९॥

४

अनुमतः

श्रमिति॥ ॥किंच त्वं प्रसन्नेन सता महर्षिणा सम्यक् विनीय शिक्षयित्वा विद्यामुपदिश्येत्यर्थः॥ गृहाय गृ
हस्थाश्रमं प्रवेष्टुं॥ क्रियार्थोपपदेत्यादिना चतुर्थी॥ अपि॥ अनुज्ञातः किं॥ हि यस्मात्ते तव सर्वेषामा
श्रमाणां ब्रह्मचर्यवानप्रस्थयतीनां उपकारे क्षमं शक्तं॥ क्षमं शक्ते हिते त्रिष्विति अमरः॥ द्वितीयमाश्र
मं गार्हस्थ्यं संक्रमितुं प्राप्तुं अयं कालो हि॥ विद्याग्रहणानंतरं पात्रस्येति भावः॥ कालत्वसमयवेला

त्वमिति प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय॥ कालो ह्ययं संक्रमितुं द्वितीयं सर्वो
पकारक्षममाश्रमं ते॥१०॥ तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रियया उत्सुकं मे॥ ॥

मुत्सुकमत्र प्रत्ययः॥ सर्वोपकारक्षममित्यत्र मनुः॥ यथा मातरमाश्रित्य सर्वे जीवंति जंतवः॥ वर्त्तंते गृहि
णस्तद्वदाश्रित्येतर आश्रमाः इति॥१०॥ कृतार्थत्वप्रश्नं विधाय आगमनप्रश्नं चिकीर्षुराह॥ तवेति॥ अर्ह
तः पूज्यस्य प्रकारस्य॥ अर्हः प्रशंसायामिति शतृप्रत्ययः॥ तव अभिगमनेन आगमनमात्रेण मे नो मे
न तृप्तं न तुष्टं किंतु नियोगक्रियया॥ आज्ञाकरणेनोत्सुकं सोत्कंठं॥ इष्टार्थोद्युक्तउ
त्सुकः इत्यमरः॥ ॥

भक्तिरिति॥ प्रतीक्षेषु पूज्येषु॥ पूज्यप्रतीक्ष्यस्तु समौ इत्यमरः॥ भक्तिरनुरागविशेषः। तेन वक्तुर्लोचिता कुलाभ्य
स्ता॥ अन्यस्तेषु चितं वाच्यमिति यादवः। हे महाभाग सार्वभौम त्वया नक्ष्या पूर्वानतिशेषे अतिवर्तसे। किं
तु सर्वत्र वार्त्तं चे त्तर्हि कथं खेदः खिन्न इव हन्त समेऽस्तु तत्राह॥ व्यतीतेति॥ अहं व्यतीतकालोऽतिक्रांत
कालः सन् अर्थिनावात्वामभ्युपेत इति मे विषादः॥१४॥ शरीरेति॥ हे नरेंद्र तीर्थसत्पात्रे प्रतिपादिता

भक्तिः प्रतीक्षेषु कुलोचिता ते पूर्वान्महाभाग तयातिशेषे॥ व्यतीतकालस्त्वहमभ्युपेतस्त्वाम
र्थिभावादिति मे विषादः॥१४॥ शरीरमात्रेण नरेंद्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः॥
आरण्यकोपात्तफलप्रसूतिः स्तंबेन नीवार इवावशिष्टः॥१५॥

दत्ताकृधियेन सत तथोक्तः॥

तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु इति विश्वः। येनोत्तमार्थं तारे च मंत्राद्युपाध्याय स्वपि॥
पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यादृर्शनेष्वपीति॥ हलायुधः। शरीरमात्रेण तिष्ठन् आरण्यकाः अर
ण्या भवा मनुष्या मुनिमुख्याः॥ आरण्यान्मनुष्य इति वुञ्प्रत्ययः। तैरुपात्ता फलप्रसूतिर्य
स्य सः। स्तंबेन कांडेनावशिष्टः॥ प्रकृत्यादित्वात्तृतीया। नीवार इवासि शोभसे॥१५॥ कपपकप

स्थानइति॥ ॥भवानेकनराधिपः सन् सार्वभौमः सन् मखजं यज्ञजं॥ नविद्यते किंचन यस्य स अकिंचनः॥ अ
चोपचामिस्याद्दिनामपूर्वसकादिषु निपातनात् तस्य भावस्त्वं निर्धनत्वं व्यनक्ति प्रक
टयति तत्स्थाने युक्तं॥ युक्ते द्वे सांप्रतं स्थाने इत्यमरः॥ तथाहि॥ सुरैः पर्यायेण क्रमेण पीतस्य हिमांशोः
कलाक्षयो वृद्धेरुपचयात् श्लाघ्यतरो हि वरः खलु॥ तन्निम्बार्शो नंतेगलितविभवाश्चार्थिषु नराइति

न स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति॥ पर्यायपीतस्य सुरैर्हिमांशोः कला
क्षयः श्लाघ्यतरो हि वृद्धेः॥१६॥ तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये॥

गाव॥ अत्र कामंदकः॥ धर्मार्थं क्षीणकोशस्य क्षीणत्वमपि शोभते॥ सुरैः पीतावशेषस्य कृष्णपक्ष
विधोरिवेवेति॥१६॥ तदिति॥ ॥ तत्तस्मात्तावदनन्यकार्यः॥ यावत्तावच्च साकल्येवधौ माने अवधा
रणे प्रयोजनांतररहित एवाहं अन्यतो वदान्यांतरात् गुर्वर्थं गुरुधनं आहर्तुं॥ ॥ ॥

ञ्जरुक्तिं तुयत्किम्बेत्तद्योऽस्मै ॥ ते तुभ्यं स्वस्ति सुतनमस्तु ॥ नमः स्वस्तीत्यादिना चतुर्थी ॥ तथापि ॥ चातकोऽपि ध
रणिपतितं० तोयं चातकानां रुजाकरमिति हेतोरनन्यगतिकोपीत्यर्थः ॥ निर्गलितं अम्बु एव गर्भो
यस्य तं शरद्घनं नार्दति न याचते ॥ अर्द गतौ याचने चेति धातुः ॥ याचनार्थे रणे ईनमिति यादवः ॥१
॥एतावदिति॥ ॥एतावद्वाक्यमुक्त्वा प्रतियातुंकामो यस्य तं प्रतियातुकामं गंतुकामं ॥ तुंकामम

स्वस्त्यस्तु ते निर्गलितांबुगर्भं शरद्घनं नार्दति चातकोपि ॥१७॥ एतावदुक्त्वा प्रतियातुकामं शि
ष्यं महर्षेर्नृपतिर्निषिध्य ॥ किं वस्तु विद्वन् गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुंक्त ॥१८॥

नसोरपीति मकारलोपः ॥ महर्षेः वरतंतोः शिष्यं कौत्सं नृपतिः रघुः निषिध्य निवार्य हे विद्वन्
त्वया गुरवे प्रदेयं वस्तु किमात्मकं कियत् किं परिमाणं कं चेति एवं कौत्सं तं अन्वयुंक्त अपृ
च्छत् ॥ पृश्नोनुयोगः पृच्छा चेत्यमरः ॥१८॥ ॥

ग
गुरवे

ततइति ॥ ततो यथावद्यथार्हं ॥ अर्हार्हे वतिः ॥ विहिताध्वराय विधिवदनुष्ठितमखाय स्मयावेशवर्जितायेत्यर्थः ॥ स्मयावेशविवर्जिताय र्गर्वाभिनिवेशशून्यायमभ्यनुसृतायेत्यर्थः ॥ वर्णानां ब्राह्मणादीनां आश्रमाणां ब्रह्मचर्यादीनां चैनियामकाय तेषां गुरुत्वं धर्मप्रतिष्ठापकत्वं ॥ वर्णाः स्युर्ब्राह्मणादय इत्यमरः ॥ ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये आश्रमोऽस्त्रीत्यमरः सर्वकार्यनिर्वाहिकायेत्यर्थः ॥ त

ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय ॥ वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ॥१९॥ समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै ॥ स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ॥२०॥

स्मेरघुवे विचक्षणः कुशलो विद्वान्वर्णी ब्रह्मचारी ॥ वर्णिनो ब्रह्मचारिण इत्यमरः ॥ [struck through] प्रस्तुतं प्रकृतमाचचक्षे ॥१९॥ समाप्तेति ॥ समाप्तविद्येन मया महर्षिर्गुरुर्दक्षिणायै दक्षिणास्वीकारार्थं विज्ञापितोऽभूत् ॥ स च गुरुः चिरायास्खलितोपचारां ताम्भक्तिमेव पुरस्तात्प्रथमम् अगणयत् संख्यातवान् तेन तुष्टः किं दक्षिणयेत्युक्तवानित्यर्थः ॥ अथवा भक्तिमेव तां दक्षिणां इत्यगणयदिति योज्यं ॥२०॥ ॥

निर्बंधेति ॥ ॥ निर्बंधेन प्रार्थनातिशयेन संजातरुषा संजातक्रोधेन गुरुणा अर्थकार्श्यं दारिद्र्यं अचिंतयि-
त्वा विचार्य अहं हे वित्तस्य धनस्य च तस्रो दश कोटीश्चतुर्दश कोटीर्मे मह्यं आहर आनयेति विद्याप-
रिसंख्यया विद्यासंख्यानुसारेणेवोक्तः ॥ अत्र मनुः ॥ अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्त-
रः ॥ पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दशेति ॥२१॥ ॥ सोऽहमिति सोऽहं सपर्यावि-

निर्बंधसंजातरुषार्थकार्श्यमचिंतयित्वा गुरुणाहमुक्तः ॥ वित्तस्य विद्यापरिसं-
ख्यया मे कोटीश्चतस्रो दश चाहरेति ॥२१॥ सोऽहं सपर्याविधिभाजनेन मत्वा भव-
तं प्रभुशब्दशेषं ॥ अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिःक्रयस्य ॥२२॥

धिभाजनेनार्घ्यपात्रेण भवंतं प्रभुशब्द एव शेषो यस्य तं मत्वा निःस्वं निश्चित्येत्यर्थः ॥ श्रुतनि-
ष्क्रयस्य विद्यामूल्यस्याल्पेतरत्वात् महत्त्वात् संप्रत्युपरोद्धुं निर्बंधुं नाभ्युत्सहे ॥२२॥ ॥

इत्थमिति॥ ॥द्विजराजकांतिश्चंद्रकांतिः चंद्रसमकांतित्वेन तदर्थी प्राप्तिवैराग्यं वारयति॥ द्विजराजः रात्रा
धीशेन नक्षत्रेशः क्षपाकर इत्यमरः॥ तस्मात् सोमोस्माकं राजा ब्राह्मणानामिति श्रुतेः॥ एनसो निवृत्ता इंद्रियवृ
त्तिर्यस्य सः॥ जगदेकनाथो रघुर्वेदविदां वरेण श्रेष्ठेन द्विजेन कौत्सेन इत्थमावेदितो निवेदितः सन् एनं कौत्सं

इत्थं द्विजेन द्विजराजकांतिरावेदितो वेदविदां वरेण॥ एनोनिवृत्तें
द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः॥ २३॥ गुर्वर्थ
मर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामं॥ ॥

रितोवे

भूयः पुनर्जगाद॥ २३॥ ॥गुर्वर्थमिति॥ श्रुतस्य पारं दृष्टवान् श्रुतपारदृश्वा॥ दृशेः क्वनिप् इत्यमरः॥ गुर
वे गुर्वर्थं गुरुदक्षिणार्थं यथा अर्थी याचकः॥ विशेषणद्वयेनाप्यस्याप्रत्याख्येयत्वमाह॥ रघोः

तथा

सकाशात् कामं मनोरथं अनवाप्य अप्राप्य वदान्यांतरं दात्रंतरं गतः॥ ॥

सुर्वदान्यः स्थूललक्ष्य दानशौण्डो बहुप्रद इत्यमरः ॥ इत्येवं रूपस्यापवादस्य नवः इदं प्रथमोऽवतारः आवि
र्भावो मे माभूत् मास्तु ॥ रघोरिति स्वनामग्रहणं संभावितत्वद्योतनार्थं तथा च संभावितस्य [illegible] कीर्तिर्म
रणादतिरिच्यत इति भावः ॥२४॥ ॥सइति॥ ॥ स त्वं महिते पूजिते प्रशस्ते प्रसिद्धे मदीये अग्न्यगारे त्रेता
ग्निशालायां चतुर्थोऽग्निरिव वसन् द्वित्राणि द्वे त्रीणि वा अहानि दिनानि ॥ स्नंख्ययाव्ययासन्नाद

गतो वदान्यान्तरमित्ययं मे माभूत्परीवादनवावतारः ॥२४॥ स त्वं प्रशस्ते महिते मदीये व
संश्चतुर्थोऽग्निरिवाग्न्यगारे ॥ द्वित्राण्यहान्यर्हसि सोढुमर्हन् यावद्यते साधयितुं त्वदर्थं ॥२५

राधिकसंख्याः संख्येय इति बहुव्रीहिः ॥ बहुव्रीहौ संख्येये डजबहुगणात् इति डच् प्रत्ययः समासान्तः
सोदुमर्हसि हे अर्हन् मान्य त्वदर्थं तव प्रयोजनं साधयितुं यावद्यते यतिष्ये ॥ यावत्पुरा निपातयो
र्लडिति भविष्यदर्थे लट् ॥ ॥२५॥ ॥

६

तथेति॥ ॥अग्रजन्माब्राह्मणः॥प्रतीतः॥प्रीतः सन्॥तस्यरघोरवितथममोघंसंगरंप्रतिज्ञां॥अथप्रतिज्ञा
ऽसंविदापत्सुसंगरइत्यमरः॥तांगिरमितिकेचित्पठंति॥तथेतिप्रत्यग्रहीत्॥रघुरपिगांभूमिंआत्तसा
रांगृहीतधनामवेक्ष्यकुबेरान्निःकृष्टुमाहर्तुंचकमे॥इयेष॥२६॥ ॥वसिष्टेति॥ ॥वसिष्टस्यमं
त्रेणोक्षणमभिमंत्र्यप्रोक्षणं॥तज्जात्प्रभावात्सामर्थ्याद्धेतोः॥उदन्वदाकाशमहीधरेषुउदन्वति

तथेतितस्याऽवितथंप्रतीतःप्रत्यग्रहीत्संगिरमग्रजन्मा॥गामात्तसारांरघुरप्यवे
क्ष्यनिःकृष्टुमर्थंचकमेकुबेरात्॥२६॥वसिष्ठमंत्रोक्षणजात्प्रभावादुदन्वदाका
शमहीधरेषु॥मरुत्सखस्येवबलाहकस्यगतिर्विजघ्नेनहितद्रथस्य॥२७॥ ॥

उदधौआकाशेमहीधरेषुमरुत्सखस्यमरुतःसखेतितत्पुरुषः॥बहुव्रीहौसमासांताभावात्॥नतो
वायुसहायस्येतिलभ्यते॥वारीणांवाहकोबलाहकः॥पृषोदरादित्वात्साधुः॥तस्येवमेघस्येव
तद्रथस्यगतिःसंचारोनविजघ्नेनविहिताहि॥२७॥ ॥

अथेति॥ अथ प्रदोषे रजनीमुखे तत्काले यानाधिरोहणविधानात्॥ प्रयतो धीरो रघुः सामंतात् नव सामंतो
राजमात्रमिति संभावनयैव कैलासनाथं कुबेरं तरसा बलेन जिगीषुः॥ जेतुमिच्छुः सन् कल्पितं सज्जितं अ
स्त्रं गर्भे यस्य तं रथमधिशिष्ये रथे शयितवानित्यर्थः॥ अधिशीङ्स्थासां कर्म्मे कर्मत्वं॥२८॥ प्रातरिति॥

स्वथाधिशिष्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भं॥ सामंतसंभावनयैव धीरः कै
लासनाथं तरसा जिगीषुः॥२८॥ प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोशगृहे
नियुक्ताः॥ हिरण्मयीं कोशगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः॥२९॥ ॥

प्रातः प्रयाणाभिमुखाय तस्मै रघवे कोशगृहे नियुक्ताः अधिकृताः भांडागारिकाः सविस्मयाः संतः को
शगृहस्य मध्ये नभसः पंचम्यास्तसिल्प्रत्ययः पतितां हिरण्मयीं सुवर्णमयीं॥ दांडिनीयनेत्यादिना
निपातात् साधुः॥ वृष्टिं शशंसुः कथयामासुः॥२९॥ ॥

आशास्यमिति॥ ॥सर्वाणिश्रेयांसिश्रुतानिअधिजग्मुषः प्राप्तवतः तेनवान्यत्पुत्रातिरिक्तमात्मगुणस्यंश्ला
घीःसाध्यंपुनरुक्तंवृत्तंसर्वंसिद्धमित्यर्थः॥ ॥किंत्वीदृशंस्तुत्यंभवंतंभवतःपितेवात्मानुरूपंत्वत्तुल्यगुणमभिस
र्थः॥ ॥पुत्रंलभस्वप्राप्नुहि॥३४॥ ॥इत्थमिति॥ ॥अग्रजन्माब्राह्मणः॥ ॥अग्रजन्माद्विजेश्रेष्ठेभ्रातरिब्रह्म
णिस्मृतइतिविश्वः॥ ॥इत्थंराज्ञेआशिषंदत्त्वागुरोःसकाशंसमीपंप्रतीयायप्राप॥ ॥राजापिजीवलोकेःप्रो

पुन

आशास्यमन्यत्पुनरुक्तभूतंश्रेयांसिसर्वाण्यधिजग्मुषस्ते॥ ॥पुत्रंलभस्वात्मगुणानुरूपंभवंतमीड्यं
भवतःपितेव॥ ॥३४॥ ॥इत्थंप्रयुज्याशिषमग्रजन्माराज्ञेप्रतीयायगुरोःसकाशं॥ ॥राजापिलेभेसुत
माशुतस्मादालोकमर्कादिवजीवलोकः॥ ॥३५॥ ॥ब्राह्मेमुहूर्तेकिलतस्यदेवीकुमारकल्पंसुषुवे
णिसमूहः॥ ॥जीवःप्राणिनिगीष्पताविति विश्वः॥ ॥अर्कात्॥ ॥आलोकंप्रकाशमिवचैतन्य कुमारं॥ ॥
मितिपावेत्तानमिव॥ ॥तस्मात्कौत्सवाक्याद्गुरुसुतंलेभेप्राप॥ ॥३५॥ ॥ब्राह्म इति॥ ॥तस्यरघोर्महिषीब्राह्मे
तस्येदमित्यण्॥ ॥ब्रह्मदेवताके॥ ॥अभिजिन्नामकेमुहूर्तेकिलईश्वरपरिसमाप्ताविवादिनाकल्पप्रत्ययः
~~कुमारकल्पंस्कंदतुल्यमित्यर्थः॥~~ ॥ कुमारंपुत्रंसुषुवे॥ ॥कुमारोबालकेस्कंदइतिविश्वः

गुणा

कुमारकल्पंस्कंदतुल्यमित्यर्थः॥

अतो ब्राह्ममुहूर्तोत्पन्नत्वात् पिता रघुः ब्रह्मणो विधेरेव नाम्ना तमात्मजन्मानं पुत्रं अजं नाम तं चकार॥ अजो हरौ हरे कामे विधौ छागे रघोः सुते इति विश्वः॥३६॥ ओजस्वि तेजिष्ठं वा॥ ओजस्तेजसि धातूनां अवष्टंभ प्रकाशयोः ओजो बले च दीप्तौ चेति विश्वः॥ रूपं वपुः॥ अथ रूपं नपुंसकं स्वभावाकृतिसौंदर्यवपुःषु श्लो

अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार॥३६॥ रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वं॥ न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात्॥३७॥

कयोः शब्दयोरिति केशवः॥ तदेव पितृक्रमेव वीर्यं शौर्यं तदेव नैसर्गिकं स्वाभाविकं उन्नतत्वं तदेव तादृगे वेत्यर्थः॥ कुमारो बालकः॥ प्रवर्तितः उत्पादितो दीपः प्रदीपात्॥ सो सारक दीपात् इव स्वात् स्वकीयात्॥ पूर्वादिभ्यो वेति स्म्याद्भावो वैकल्पिकः॥ कारणात् जनकात् न बिभिदे भिन्नो नाभूत् सर्वात्मना तादृगेवा भूदित्यर्थः॥३७॥ ॥

उपात्तेति ॥ गुरुभ्यो विधिवद्यथाशास्त्रं उपात्तविद्यं लब्धविद्यं यौवनस्योद्भेदाद्दाविर्भावाद्धेतोर्विशेषेण कां-
तं सौम्यं तमजं प्रतिसाभिलाषापि श्रीः धीरोन्नतविन्नात् ॥ स्थिरचित्तोन्नतिर्यातु नैद्धैर्यमिति संज्ञितमिति
भूपालः ॥ कन्यापितुश्चगुरोः रघोः अनुज्ञामाचकांक्षस्येष ॥ यौवराराज्याहौः भूदित्यर्थः ॥ अनुज्ञा

उपात्तविद्यं विधिवद्गुरुभ्यस्तं यौवनोद्भेदविशेषकांतं ॥ श्रीर्गंतुकामापिगुरोरनुज्ञां धीरेव कन्या

रा पितुराचकांक्षः ॥३८॥ अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिंदुमत्याः ॥ ॥

शक्त्यात्मिह्यपारतं समुपमासामर्थ्यासाणिग्रहणयोग्यताच ध्वन्यते ॥३८॥ अथेति ॥ अथ स्वसुर्भगिन्याः
इंदुमत्याः स्वयंवरार्थं कुमारस्यानयने उत्सुकेन क्रथकैशिकानां विदर्भदेशानामीश्वरेण स्वामिना भोजे-

नरात्तान्नाप्तो हि हृतो रघवे विसृष्टः प्रेषितः ॥ क्रियामात्रयोगेपि चतुर्थी तत्राप्तग्रहणं तत्रैव तात्पर्यद्योतना
र्थं ॥ ३९ ॥ तमिति ॥ तस्मै रघुः तं भोजं श्लाघ्यपसंबंधं श्लक्ष्णवानलादिगुणयोगात्स्पृहणीयसंबंधौ विचिंत्य धं

त्नाप्तः कुमारानुमतेन भोजेन दूतो रघवे विसृष्टः ॥ ३९ ॥ तं श्लाघ्यसंबंधमसौ विचिं
त्य दारक्रियायोग्यदशं च पुत्रं ॥ प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीं ॥ ४०

स

विचार्य पुत्रं च दारक्रियायोग्यदशं विवाहयोग्यवयसं विचिंत्य ससैन्यमेनं पुत्रं ऋद्धां विदर्भाधिपस्य भो
जस्य राजधानीं पुरीं प्रति प्रस्थापयामास ॥ धीयंतेऽस्यामिति धानी ॥ करणाधिकरणयोश्चेत्यधिकर
णार्थे ल्युट् ॥ प्रत्ययः राज्ञां धानीति विग्रहः ॥ ४० ॥

तस्येति ॥ उपकार्यासु राजसद्मोपयोग्येषु पटमण्डपादिषु ॥ सौधेऽस्त्री राजसदनं उपकार्योपकारिके इत्यमरः ॥ वचनव्या
ख्याने क्षीरस्वामी ॥ उपक्रियते उपकरोति च पटमण्डपादि राजसदनमिति ॥ रचिता उपचाराः पूजनादयो ये
षु ते तथोक्ताः ॥ जनपदानां जनपदेभ्यः आगतानां उपदाभिरुपायनैः वन्यैर्वनभवाः इतरे येषां ते वन्येतरा
श्च वन्या इत्यर्थः ॥ न बहुव्रीहाविति सर्वनामसंज्ञा उपचाराः एव तस्य मनुजेन्द्रसूनोरजस्य मार्गे निवासाः वास

तस्योपकार्यार्चितोपचारा वन्येतरा जानपदोपदाभिः ॥ मार्गे निवासा मनुजेन्द्रसूनोर्बभूवुरु
द्यानविहारकल्पाः ॥ ४१ ॥ स नर्मदारोधसि शीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले ॥ ॥

निकाः ॥ उद्यानानि क्रीडाः प्रमाणाक्रीड उद्यानमित्यमरः ॥ तान्येव विहारस्थानानि तत्कल्पाः तत्त
ुल्या इत्यर्थः ॥ ईषदसमाप्ताविति कल्पप्प्रत्ययः बभूवुः ॥ ४१ ॥ ॥ स इति ॥ विलंघिताध्वा अतिक्रान्तमार्गः
स अजः शीकरार्द्रैः शीतलैरित्यर्थः ॥ मरुद्भिर्वातैरानर्तिताः कंपिताः नक्तमाला यस्मिंस्तस्मिन् ॥ ॥

ल्लिवेशण ईरत्यर्थः ॥ चिरबिल्वाख्यवृक्षसमेतः ॥ चिरबिल्वनक्तमालः करजश्च करंजकरत्यमरः ॥ नर्मदायारोध
सिरेवापारतीरे क्लांतं श्रांतं रजोभिर्धूसराः केतवो ध्वजा यस्य तत्सैन्यं निवेशयामास ॥४२॥ अथेति ॥ अथोप
रिष्टादूर्ध्वं ॥ उपर्युपरिष्टादितिनिपातः ॥ भ्रमद्भिर्मंडलीभवद्भिरिति भावः ॥ भ्रमरैः प्रागुन्मज्जनात्पूर्वं सूचितो
ज्ञापितोंऽतःसलिलप्रवेशो यस्य स तथोक्तः ॥ निर्धौतदानेक्षालितमदे न एवामले गंडभित्ती यस्य स तथोक्तः ॥ दा

निवेशयामास विलंघिताध्वा क्लांतं रजोधूसरकेतु सैन्यं ॥४२॥ अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्रा
क्सूचितांतःसलिलप्रवेशः ॥ निर्धौतदानामलगंडभित्तिर्वन्यः सरित्तो गज उन्ममज्ज ॥४३॥

नं गजमदे इत्यमरः ॥ गंडस्थलमिति शाश्वतः ॥ निर्धौतदाना चासावमला च गंडभित्तिश्च ॥ प्रशस्तौ गंडौ इति गंडभित्ती प्रशंसावच
नश्चेति समासः ॥ भित्तिशब्दः प्रशस्तार्थः ॥ तथा गणरत्नमहोदधौ ॥ मतल्लिहस्तिमिश्राः स्युः प्रकांडस्य
लभित्त्यय इति भित्तिप्रदेशे वा ॥ भित्तिः स्त्रीकुड्यप्रदेशेपीति विश्वः ॥ निर्धौतदानेनामले गंडभित्ती यस्य सोऽपि वा
॥ वन्यो गजः सरित्तो नर्मदायाः सकाशात् ॥ पंचम्यास्तसिल्प्रत्ययः ॥ उन्ममज्जोत्थितः ॥४३॥ ॥

गंडौ

स्तं॰

न

निःशेषेति ॥ कथंभूतो गजः निःशेषं विक्षालितधातुनापि धौतगैरिकादिनापि नीलाभिरूर्ध्वरेखाभिस्सदा
भिघातजनिताभिः शबलेन कर्बुरेण ॥ चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे इत्यमरः ॥ अश्मभिः पा
षाणैः विकुंठितैः कुंठीकृतेन दंतद्वयेन ऋक्षवान्नाम तत्रत्यः कश्चित्पर्वतः तस्य तटेषु वप्रक्रियां व

निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु ॥ नीलोर्ध्वरे
खाशबलेन शंसन् दंतद्वयेनाश्मविकुंठितेन ॥ ४४ ॥ [illegible] संहारवि
क्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दं ॥ ॥ श्रीः ॥ ॥

प्रक्रीडं उत्खातकेलिः शृंगाद्यैर्वप्रक्रीडा निगद्यते इति शाश्वतः ॥ शंसन् कथयन् स्थित इत्य
र्थः ॥ ४४ ॥ संहारेति ॥ संहारविक्षेपयोः संकोचनप्रसारणयोर्लघुक्रियेण क्षिप्रव्यापारेण ॥ ल
घुक्षिप्रमरं द्रुतं इत्यमरः ॥ हस्तेन शुंडादंडेन ॥ हस्तो नक्षत्रभेदे स्यात्करेभकरयोरपि इति विश्वः ॥ सशब्दं ॥

रघुवं॰टी॰ सघोषं हहतस्तरंगान् भिदंन् विदारयन् तीराभिमुखः सगजः ।। वारीगंजबंधनस्थानं ।। वारीतु गजबधनी सर्ग॰५
९५ तियार्व ।। वार्यां अर्गलायां विष्कंभस्य संगेनं जनेशं हहन्नरवबभौ ।। ४५ ।। शैवलेति ।। शैवलोपमः सगजः
शैवलमंजरीणां जालानि हंदानि [हंदानि] उरसाकर्षन् पश्चात्तटं उत्ससर्प पूर्वं तेन गजेनोत्पीडितो नुन्नो

बभौ स निर्दहन् हहतस्तरंगान् वार्यर्गलाभंगरवप्रवृत्तः ।। ४५ ।। शैवलोपमः शैवलमंजरीणां जा
लानि कर्षन् उरसा स पश्चात् ।। पूर्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्तटमुत्ससर्प ।। ४६ ।।
ध्यो तस्यैकनागस्य कपोलभित्त्यो[र्जला]वगाहक्षणमात्रशांता ।। वन्येतरानेकपदर्शनेन पुनर्दिदी त्योर्जला
पे मददुर्दिनश्रीः ।। ४७ ।। वारिराशिर्यस्य सः सरित्प्रवाहः तटमुत्ससर्प ।। ४६ ।। तस्येति ।। तस्यैकना
गस्यैकाकिनो गजस्य कपोलभित्त्योर्जलावगाहेन जलस्नानेन क्षणमात्रं शांता निवृत्ता मददुर्दिन ९५
श्रीः मदवर्षलक्ष्मीः वन्येतराणां ग्राम्याणां अनेकपानां द्विपानां दर्शनेन पुनर्दिदीपे ।। ४७ ।। ।

रघो

सप्तछदेति॥ ॥सप्तछदस्य वृक्षविशेषस्य क्षीरवत्कटुः सुरभिः प्रवाहः प्रसारो यस्य तं॥ कटुतिक्तकषायास्तु सौरभ्येपि प्रकीर्त्तिता इति यादवः॥ असह्यं तदीयं मदमाघ्राय सेनागजेंद्रा विलंघितस्तिरस्कृतः आधोरणानां हस्तिपकानां तीव्रो महान् प्रयत्नो यैस्ते तथोक्ताः संतः आधोरणाः हस्तिपकाः हस्त्यारोहा निषादिन इत्यमरः॥ विमुखाः पराङ्मुखा बभूवुः॥ ४८॥ सइति॥ ॥सगजः छिन्ना बंधा येषां ते छिन्नबंधाः द्रुताः पला

सप्तछदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयं॥ विलंघिताधोरणतीव्रयत्नाः सेनागजेंद्रा विमुखा बभूवुः॥ ४८॥ सछिन्नबंधद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन॥ ॥

यिताः युगं वहंतीति युग्याः वाहा यस्मिन् तत्सः॥ स चासौ शून्यश्च तं॥ भग्ना अक्षाः रथावयवदारुविशेषाः॥ अक्षो रथस्यावयवे पाशकेप्यक्षमिंद्रिये मितिरभसः॥ येषां ते भग्नाक्षास्त एव पर्यस्ताः पतिताः रथा यस्मिन् तं तरामाणं स्त्रीणां परित्राणे संरक्षणे विहस्ताः व्याकुलाः॥

प

करीः

विहस्तव्याकुलौसमावित्यमरः॥ योधाश्चयस्मिन्तंसेनानिवेशंक्षिविरं क्षणेनक्षणमात्रंतुमुलंचकार॥४९

तमिति॥ ॥नृपतेःराज्ञोवध्यःअवध्यइतिश्रुतवान्शास्त्रात्ज्ञातवान्कुमारः॥ आपतन्तंअभिधावं
तंतंगजंनिवर्त्तयिष्यन्तुहरिष्यन्अतएवनात्यायतंनातिदीर्घं॥ नत्वर्थस्य नञाबद्धस्यसुप्सु

रामापरित्राणविहस्तयोधंसेनानिवेशंतुमुलंचकार॥४९॥ तमापतंतंनृपतेरवध्यो
वन्यःकरीतिश्रुतवान्कुमारः॥ निवर्त्तयिष्यन्विशिखेनकुंभेजघाननात्यायतकृ
ष्टचापः॥५०॥

पेतिसमासः॥ कृष्टःआकृष्टः ईषदाकृष्टचापःसन्विशिखेनबाणेनकुंभे
जघान॥ अत्रचापस्तुषः॥ लक्ष्मीकामोयुधादन्यत्रकरिवधंनकुर्यात्इत्ययंहिश्रीपतेःकरिणइति

॥ अतएवयुधादन्यत्रघोतनार्थमिवअन्यग्रहणंकृतं॥५०॥ ॥श्रीरामकृष्णायनमः॥ ॥

सरति॥ ॥स गजो विद्धमात्रस्ताडितमात्रः किं (लन) तु प्रकृतः ॥ तथापि नागरूपं।रूपं गजशरीरं उत्सृज्य ते
न दृष्टं तेन विस्मितैः तद्विस्मितैः सैन्यैः दृष्टः सन् स्फुरतः प्रभामंडलस्य मध्यवर्तिकांतं मनोहरं वपुः प्र
पेदे प्राप॥॥५१॥ अथेति॥ अथ प्रभावेन उपनतैः प्राप्तैः कल्पद्रुमोत्थैः कल्पवृक्षोत्पन्नैः पुष्पैः कुमा

स विद्धमात्रः किल नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः॥ स्फुरत्प्रभामंडलमध्यवर्ति
कांतं वपुर्व्योमचरं प्रपेदे॥५१॥ अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः॥
उवाच वाग्मी दशनप्रभाभिः संवर्धितोरस्थलतारहारः॥५२॥ ॥

रमवकीर्याच्छाद्य द
शनप्रभाभिः दंतकांतिभिः संवर्धिता उरःस्थले ये तारहाराः स्थूलमुक्ताहारास्ते येन स तथोक्तः॥ वाचो
ऽस्य संतीति वाग्मी वक्ता॥ वाचो ग्मिनिरिति ग्मिनिप्रत्ययः॥ स पुरुष उवाच॥५२॥ ॥

मतंगेति ॥ आवलेपमूलात्गर्वहेतुकात् ॥ अवलेपस्तु गर्वे स्यात् लेपने दूषणेऽपि चेति विश्वः ॥ मतंगजस्य मुनेः शा
पात् मतंगजत्वं गजत्वं अवाप्तवानस्मि ॥ मां प्रियदर्शनस्य प्रियदर्शनाख्यस्य गंधर्वपतेः गंधर्वराजस्य तनू
जं स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः ॥ तन्वादेर्वेति केचिदित्युक्तं ॥ प्रियंवदतीति प्रियंवदं ॥ प्रियवशे वदः
खजिति खच्प्रत्ययः ॥ प्रियंवदाख्यमेव जानीहि ॥ ५३ ॥ स इति ॥ स महर्षिश्च प्रणतेन मयाऽनुनी

मतंगशापादवलेपमूलादवाप्तवानस्मि मतंगजत्वं ॥ अवैहि गंधर्वपतेस्तनूजं प्रियंवदं मां प्रिय
दर्शनस्य ॥ ५३ ॥ स चानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत् ॥ उष्णत्वमग्न्यातप
संप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य ॥ ५४ ॥ तः सन् पश्चात् मृदुतां शांतिमगच्छत् ॥ तथाहि ॥
जलस्योष्णत्वं अग्नेरातपस्य वा संयोगात् संपर्कात् न तु प्रकृत्या उष्णत्वं यत् शैत्यं सा प्रकृतिः स्वभावः
विधेयप्राधान्यात् सेति स्त्रीलिंगनिर्देशः ॥ महर्षीणामपि शांतिरेव स्वभावो न क्रोध इत्यर्थः ॥ ५४ ॥

इक्ष्वाकु इति ॥ ॥ इक्ष्वाकुवंश्यः प्रभवो यस्य सो ऽजो यदा ते कुंभमयोमुखेन लोहाग्रेण शरेण भेत्स्यति विदारयि
ष्यति ॥ तदा स्वेन वपुषा महिम्ना पुनः संयोक्ष्यसे संगंस्यसे ॥ इति स तपोनिधिर्मामवोचत् ॥ ५५ ॥ संमोचि
त इति ॥ ॥ चिरं प्रार्थितं दर्शनं यस्य तेन सत्त्ववता बलवता त्वया ऽहं शापात् संमोचितः मोक्षं प्रापितः

इक्ष्वाकुवंश्यः प्रभवो यदा ते भेत्स्यत्यजः कुंभमयोमुखेन ॥ संयोक्ष्यसे स्वेन वपुर्महिम्ना तदि
त्यवोचत्स तपोनिधिर्मां ॥ ५५ ॥ सम्मोचितः सत्त्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन
॥ प्रतिप्रियं चेद्भवतो न कुर्यां वृथा हि मे स्यात्स्वपदोपलब्धिः ॥ ५६ ॥ ॥ श्रीः ॥ ॥

प्र

॥ भवतस्तव प्रतिप्रियं प्रत्युपकारं न कुर्यां चेन्मे स्वपदोपलब्धिः स्वस्थानप्राप्तिः ॥ पदं व्यवसितत्रा
णस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः ॥ वृथा व्यर्था स्यादित्युक्तं ॥ प्रतिकर्तुमशक्तस्य जीवितात् म
रणं वरमिति ॥ ५६ ॥ ॥

संमोहनमिति॥ ॥हे सखे सखित्वाद्धेतोर्मम प्राणेतोक्ता॥ यथोक्तं॥ असाग्रः सहनो बंधुः सदैवानुमतः सुहृद्
त्। एकक्रियं भवेन्मित्रं समप्राणः सखा मत इति॥ प्रयोगसंहारयोः प्रक्षेपसंकोचयोर्विभक्तमंत्रं गांधर्व
देवताकं॥ संमोहयंते वीरा अनेनेति संमोहनं नाम मम मत्तः अस्त्रमाधत्स्व गृहाण॥ यतो अस्मात् प्रयोक्तुरस्त्र
प्रयोगिणोः अरिहिंसा न च विजयश्च हस्ते हस्तगतो विजयो भवतीत्यर्थः॥५७॥ बधलज्जितः कथमस्त्रम्

संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमंत्रं॥ गांधर्वमादत्स्व यतः प्रयोक्तुर्न चारि
हिंसा विजयश्च हस्ते॥५७॥ अलं ह्रिया मां प्रति यन्मुहूर्तं दयापरोऽभूः प्रहरन्नपि त्वं॥ त
स्मादुपच्छंदयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यं॥५८॥

हरणपरः स्यामिति चेत्तत्राह॥ ॥अलमिति॥ ॥किंच मां प्रति ह्रिया प्रहारनिमित्तया अलं कृतः यद्यतो हे
तोः त्वं मां प्रहरन्नपि मुहूर्तं दयापरः कृपालुरभूः॥ तस्मादुपच्छंदयति प्रार्थयमाने मयि त्वया प्रतिषेधः
परिहारः स एव रौक्ष्यं पारुष्यं तन्न प्रयोज्यं न कर्तव्यं॥५८॥ ॥

तथेति॥ ॥नासोमपः स्पृशेदस्वेति न्नसोमः॥सोमगंधिधिवंदयोरिति न्नगम्भतः॥पुरुषश्रेष्ठ इत्यर्थः॥उपाभितसमा
सः॥अस्त्रवित् अस्त्रज्ञः॥सोऽजस्तथेति सोमउद्भवो यस्यास्तस्याः सोमोद्भवायाः सरितो नर्मदायाः॥रे
वा तु नर्मदा सोमोद्भवा मेकलकन्यकेत्यमरः॥पवित्रं पय उपस्पृश्य पीत्वा आचम्येत्यर्थः॥उदङ्मुखः सन् त्य

॥ तथेत्युपस्पृश्य पयः पवित्रं सोमोद्भवायाः सरितो नृसोमः॥ उदङ्मुखः सोऽस्त्रविदस्त्रमं
॥ त्रं जग्राह तस्मान्निगृहीतशापात्॥५९॥ एवं तयोरध्वनि दैवयोगादासेदुषोः सख्य
॥ मचिंत्यहेतु॥ एको ययौ चैत्ररथप्रदेशान् सौराज्यरम्यानपरो विदर्भान्॥६०॥

निगृहीतशापान्निवर्तितशापादुपकृतादित्यर्थः॥तस्मात्प्रियंवदादस्त्रमंत्रं जग्राह॥५९॥एवमि
ति॥ ॥एवमध्वनि मार्गे दैवयोगाद्दैववशादचिंत्यहेतुमनिर्धार्यहेतुकं सख्यं सखित्वं सख्युर्य इति
यप्रत्ययः॥आसेदुषोः प्राप्तवतोस्तयोर्मध्ये एको गंधर्वश्चैत्ररथस्य कुबेरोद्यानस्य प्रदेशान्॥अस्योद्या
नं चैत्ररथं स्यादित्यमरः॥

रघुवं॰टी॰ ॥ सर्ग॰ ५ ॥

॥ १९ ॥

अपरोऽजः सौराज्येन राजन्वत्तया रम्यान् विदर्भान् विदर्भदेशानुपयो ॥ ६० ॥ तमिति ॥ नगरस्योपकंठे समीपे
तस्थिवांसं तमजं तस्याजस्यागमेनागमनेनारूढ उत्पन्नो गुरुः प्रहर्षो यस्य सः ॥ क्रथकैशिकेंद्रो विदर्भरा
जः प्रवृद्धोर्मिरूर्मिमाली समुद्रश्चंद्रमिव प्रत्युज्जगाम ॥ ६१ ॥ प्रवेश्येति ॥ एनमजं अग्रयायी सेवाधर्मे

॥ तं तस्थिवांसं नगरोपकंठे तदागमारूढगुरुप्रहर्षः ॥ प्रत्युज्जगाम क्रथकैशिकेंद्रश्चं ॥
॥ द्रं प्रवृद्धोर्मिरिवोर्मिमाली ॥ ६१ ॥ प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः ॥
॥ मेने यथा तत्र जनः समेतो वैदर्भमागंतुमजं गृहेशं ॥ ६२ ॥ ॥ श्रीरामाः ॥ ॥

+ स्त्री २

एपुरो गच्छन्नित्यर्थः ॥ नीचैर्नम्रः पुरं प्रवेश्य प्रवेशं कारयित्वाऽर्पितश्रीः तथा तेन प्रकारेणोपाचार
तउपाचरितवान् ॥ यथा येन प्रकारेण तत्र पुरे समेतो मिलितो जनो वैदर्भं भोजमागंतुं प्राघुर्णिकं मे
ने अजं गृहेशं गृहपतिं मेने ॥ ६२ ॥ ॥

॥ १९ ॥

तस्येति ॥ रघुप्रतिनिधिः रघुकल्पो रघुतुल्य इत्यर्थः ॥ उक्तं च दंडिना ॥ साहस्यवाच्च प्रस्तावे कल्पदेशीयदेश्या
दि प्रतिनिधी अपीति ॥ सो ऽजः प्रणतैर्नमस्कुर्वद्भिः ॥ कर्त्तरि क्तः ॥ तस्य नोजस्याधिकारे नियोगस्तस्य पु
रुषैरधिकृतैरित्यर्थः ॥ प्रदिष्टां निर्दिष्टां ॥ प्राग्द्वारस्य वेद्यां विनिवेशिताः प्रतिष्ठापिताः पूर्णकुंभा यस्यां
तां स्थापितमंगलकलशामित्यर्थः ॥ रम्यां रमणीयां नवोपकार्यां नूतनराजभवनं ॥ उपकार्या राज

॥ तस्याधिकारिपुरुषैः प्रणतैः प्रदिष्टां प्राग्द्वारवेदिविनिवेशितहेमकुंभां ॥ रम्यां रघुप्रतिनिधिः ॥
॥ स नवोपकार्यां बाल्यात्परामिव दशां मदनो ध्युवास ॥ ६३ ॥ तत्र स्वयंवरसमाहृतराजलोकं कन्या ॥
॥ ललाम कमनीयमजस्य लिप्सोः ॥

सद्मन्युपचाररचितेन्यवदिति विश्वः ॥ मदनो बाल्यात्परां शैश
वादनंतरां दशां यौवनमिवाध्युवासाधिष्ठितवान् ॥ तत्रोषितवानित्यर्थः ॥ उपान्वध्याङ्वसः इति कर्म
त्वं ॥ ६३ ॥ तत्रेति ॥ ॥ तत्रोपकार्यां स्वयंवरनिमित्तं समाहृतः संमेलितो राजलोको येन तत्कमनीयं स्पृ
हणीयं कन्याललाम कन्यासु श्रेष्ठं ॥ ललामो स्त्री ललामापि प्रभाते पुरुषे ध्वजे ॥ श्रेष्ठभूषापुंड्रशृंगपुच्छ

वर

रघुवं.टी.॥ ॥२०॥ ति याः

चिन्हाश्वलिंगिषिविनिपाहव॥ जिष्णोर्जुधुमिच्छो॥न्नेः सनं नाडप्रत्ययः॥ अस्पनावोंबोधेपुरुषस्यानि
प्रायेपरिहाने कलुषाः समर्थादृयितेव राज्ञो निद्रा चिरेण नयनाभिमुखी बभूव॥ राज्ञां कामिनं चोरं
प्रविशं प्रजागरा रतिनाव॥ अभिमुखीन्ना बोडीबं तः स्वेनावा॥६५॥ तमिति॥ ॥कर्णभूषाभ्यां निपीडि
तौ पीवरौ पीनावंसौ यस्य तं॥ शय्योत्तरछदस्यउपर्यास्तरणवस्त्रस्यविमर्देन घर्षणेन कृशोविरलो

॥ नैवावबोधकलुषा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव॥६५॥ तं कर्णभूषणनि ॥
॥ पीडितपीवरांसं शय्योत्तरछदविमर्दकृशांगरागं॥ वैतालिनं बंधमनोहराभिः प्राबोधयन्नु॥ कालति
दाम ॥ षसि वाग्भिरुदारवाचः॥६६॥ अंगरागोयस्यतं॥ नलंगनासंगात् इतिभावः॥ प्रथितबोधं प्रकृष्टज्ञानं त
मेनमजं सवयस्काः समानवयस्का उदारवाचः प्रगल्भगिरः सुतात्मजा बन्दिपुत्राः॥ वैतालिकाः स्तु
तिपाठकाः॥ वैतालिका बोधकरा इत्यमरः॥ वाग्भिः स्तुतिपाठे रुषसि प्राबोधयन्नबोधयन् प्रबोधयामासुः
॥६६॥

॥ सर्ग.५ ॥२०॥

रात्रिरिति ॥ हे मतिमतां वर निर्धारणे षष्ठी ॥ रात्रिर्गताऽतश्शय्यां मुंच विनिद्रो भवेत्यर्थः ॥ विनिद्रत्वफलमाह धात्रे
ति धात्रा ब्रह्मणा जगतो धूर्भारः ॥ धूः स्याद्यानमुखे भारे इति यादवः ॥ द्विधैव द्वयोरेवेत्यर्थः ॥ एवकारस्तृती
यनिषेधार्थ इत्यर्थः ॥ विभक्ता ननु विभक्तस्यापि तावत्खलु तत्किमत आह तां धुरं एकत एककोटौ तव
गुरुः पिता विनिद्रः सन् बिभर्त्ति ॥ तस्याः धुरो भवान् धुरं वहतीति धुर्यः ॥ भारवाही तस्य परं वाहनस्थानं त्र

॥ रात्रिर्गता मतिमतां वर मुंच शय्यां धात्रा द्विधैव ननु धूर्जगतो विभक्ता ॥ तामेकतस्तव बिभर्त्ति गुरुर्विनि
द्रस्तस्या भवानपरधुर्यपदावलंबी ॥ ६६ ॥ निद्रावशेन भवताप्यनवेक्षमाणा पर्युत्सुकत्वमबला निशि
खंडितेव ॥

तत्

परं च धुर्यपदं तदवलंबी ततो विनिद्रो भवेत्यर्थः ॥ नहि भवान् वाह्यं एको वहतीति भावः ॥ ६६ ॥
निद्रेति ॥ चंद्रारविंदराजवरनाद्यो लक्ष्मीनिवासस्थानानि इति प्रसिद्धिमाश्रित्योच्यते ॥ निद्रावशेन नि
द्राधीनेन ॥ स्त्रीनरसंयोगेत्र ध्वन्यते ॥ भवता पर्युत्सुकत्वमपि त्वय्यनुरक्ततमपीत्यर्थः ॥ प्रसितोत्सुकाभ्यां
तृतीया चेति सप्तम्यर्थे तृतीया ॥

अपिशब्दस्त्वद्विषयानुरागस्यानपेक्षत्वद्योतनार्थं ॥ निशि खंडितानन्तरन्यासंगतानकलुषिताः बलेवनापि
केव ॥ तातेन्यासंगविकृते खंडिते ईर्ष्याकषायिते भिंदन्नारूपके ॥ अनवेक्षमाणा अविचारयंती उपेक्षमाणा
इत्यर्थः ॥ लक्ष्मीर्येन चंद्रेण सह त्वदाननस्य सदृशत्वादिति भावः ॥ विनोदयति विनोदं करोति विनोदशब्दात्तत्क
रोतीति तदाचष्ट इति णिच् ॥ सादृश्यदर्शनाद्दयोहि विरहिणां विनोदस्थानानीति भावः ॥ स चंद्रोपि दिगंतलं

॥ लक्ष्मीर्विनोदयति येन दिगंतलंबी सोपि त्वदाननरुचिं विजहाति चंद्रः ॥ ६७ ॥ ॥ श्रीः ॥

बी पश्चिमाशां गतः सन् अस्तं गच्छन्तीत्यर्थः ॥ अथवा निशावशेन भवतानवेक्ष्यमाणा निरीक्ष्यमाणा ॥
कर्मणि शानच् ॥ लक्ष्मीः प्रयोजककर्त्री येन चंद्रेण प्रयोज्येन पर्युत्सकत्वं त्वद्विरहवेदनाकाशास्सम
त्वं ॥ उत्सुक्यमनस्तापज्वरादिहृदिस्यजं कारे ॥ निनोदयति निरासयति ॥ इतियोजना ॥ शेषं पूर्ववत् ॥
नाथस्तु अथोपपत्तिमपश्यन्निमं पक्षमुपेक्षिष्ट ॥ ६७ ॥ ॥

तदिति॥ ॥तत्तस्मात्तल्लक्ष्मीपरिग्रहकारणम् वल्गुना मनोज्ञेन॥ वल्गुस्थाने मनोज्ञे च वल्गु भाषितमन्यवदिति
विश्वः॥ युगपत्तावदुन्मिषितेन युगपदेवोन्मीलनेन सद्यो द्वे अपि परस्परतुलां अन्योन्यसादृश्यं अधिरोहतां
प्राप्नुतां॥ प्रार्थनायां लोट्॥ द्वे के॥ अंतः प्रस्यंदमानाचलं तीपरुषेतरा स्निग्धा तारा कनीनिका यस्य तत्तथोक्तं॥
तारकाक्ष्णः कनीनिकेत्यमरः॥ तव चक्षुः अंतः प्रचलितभ्रमरं चलद्भृंगं पद्मं च॥ युगपदुन्मिषिते सति॥ सं

॥ तद्वल्गुना युगपदुन्मिषितेन तावत्सद्यः परस्परतुलामधिरोहतां द्वे॥ प्रस्यंदमानपरुषेतरतारमंत॥
॥ श्चक्षुस्तव प्रचलितभ्रमरं च पद्मं॥ ६०॥ वृंतश्लथं हरति पुष्पमनोकहानां संसृज्यते सरसिजैररुणांशु॥
भिन्नैः॥

पूर्णसादृश्यलाभ इति भावः॥ ६०॥ वृंतेति॥ विभातवायुः प्रभातवायुः स्वाभाविकं नैसर्गि
कं तेन वसुखमारुतस्य निश्वासपवनस्य सौरभ्यं नाहर्तुकामो गंधं परगुणेनान्यदीयगुणेन संक्रा
मिकगंधेन स्पर्धं॥ ईप्सुराप्तुमिच्छुरिव॥ आप्

तत्पुष्पमीरितोकारादेशः॥अशोकहामांदृक्षाणांश्लथंशिथिलंपुष्पंबंधनात्॥वृंतंप्रसवबंधनमित्य
मरः॥हरत्यादत्ते॥अरुणांशुभिर्नेत्ररणिकिरणैर्बोधितैःसरसिजातैः॥सरसिजैःकमलैःसह॥तत्पुरुषे
कृतिबहुलमितिसप्तम्याअलुक॥संप्रहृष्यतेसंगच्छते॥घ्रजेर्दवारिकानक्तंरिलट्॥६९॥ताम्रो॥ता

॥स्वाग्नाविकंपरगुणेनविन्नातवायुःसौरभ्यमीप्सुरिवतेमुखमारुतस्य॥६९॥ताम्रोदरेषुपतितं
॥द्रुमपल्लवेषुनिर्धौतहारगुटिकाविशदंहिमांभः॥आभातिलब्धपरभागतयाधरोष्ठेली
॥लास्मितंसदशनार्चिरिवत्वदीयं॥७०॥ ॥

ताम्रोदरेषुअरुणाभ्यंतरेषुतरुपल्लवेषुपतितंनिर्धौताम्ला
हारगुटिकासुक्तामणयःतद्वद्विशदंहिमांभः॥लब्धपरभागतयालब्धगुणोत्कर्षतया॥परभागो
गुणोत्कर्षइत्यमरः॥अधरोष्ठेपतितंत्वदीयंसदशनार्चिर्दंतकांतियुक्तंलीलास्मितमिवाभातिशोभते॥७०

यावदिति॥ ॥प्रतापनिधिस्तेजोनिधिर्भानुर्यावन्नाक्रमते नोद्गच्छति॥ आङ् उद्गमने इत्यात्मनेपदं॥ तावद
नुदित एवेत्यर्थः॥ अह्नाय झटिति॥ झाक् झटिति स्यंजसाह्नायेत्यमरः॥ अरुणेनानूरुणा सूर्यसूतोऽरुणोऽनू
रुरित्यमरः॥ तमो निरस्तं तथा हि॥ हे वीर त्वयि अस्मिन्नायोधनेषु युधेषु॥ युध मायोधनं जन्यमित्यमरः॥ अ

॥ यावत्प्रतापनिधिराक्रमते न भानुरह्नाय तावदरुणेन तमो निरस्तं॥ आयोधनाग्रसर
॥ तां त्वयि वीर याते किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति॥ ७१॥ ॥

ग्रसरतां पुरःसरतां याते सति॥ तव गुरुः पिता रिपून्स्वयमुच्छिनत्ति किं वा नोच्छिनत्त्येवेत्यर्थः॥ सुखा
श्रये न्यस्तभाराणां स्वामिनां स्वयव्यापारे खेदो न भवतीति भावः॥ ७१॥ ॥

शय्यामिति ॥ उभाभ्यांपक्षाभ्यांविनीतापनीतानिद्रायेषांते ॥ उभयपक्षविनीतनिद्राः ॥ अत्र समासविष
येऽप्युभशब्दस्याने उभयशब्दप्रयोग एव साधुरित्यनुसंधेयं ॥ यथाह कैयटः ॥ उभादुदात्तो नित्यमि
ति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभशब्दस्यप्रयोगो माभूत् उभयशब्दस्यैव यथास्यादुभयपुत्र
स्यादि भवतीति ॥ मुखराः स्पुत्थानचलनाच्छब्दायमानानि शृंखलानि ॥ गजानिकर्षंतीति तथोक्ताः ॥ तेत

शय्यां जहत्युभयपक्षविनीतनिद्राः स्तंबेरमा मुखरशृंखलकर्षिणस्ते ॥ येषां विभांति तरुणा
रुणरागयोगाद्भिन्नाद्रिगैरिकतटा इव दंतकोशाः ॥ ७२ ॥ ॥

स्तंबेरमंतीति स्तंबेरमाः ॥ हस्तिनः ॥ स्तंबकर्णयो रमिजपोरित्यच्प्रत्यये हस्तिसूचकयोरिति वक्त
व्यात् ॥ इभः स्तंबेरमः पद्मीत्यमरः ॥ तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक् ॥ शय्यां जहाति त्यजं
ति ॥ येषां स्तंबेरमाणां दंताः कोशा इव दंतकोशाः ॥ दंतकुड्मलास्तरुणारुणरागयोगाद्बालार्का
रुणसंपर्कात् भिन्नाद्रिगैरिकतटा इव विभांति धातुरक्ता इव भांतीत्यर्थः ॥ ७२ ॥ ॥ ॥

दीर्घेष्विति ॥ ॥ हे वनजाक्ष नीरजाक्ष ॥ वनं नीरं वनं सलिलमिति शाश्वतः ॥ वने सलिलकानने इत्यमरः ॥ दीर्घेषु
पटमंडपेषु नियमिताः बद्धाः ॥ वनायुदेश्याः वनायुदेश्याः वनायुदेशे भवाः ॥ पारसीका वनायुजा इति हला
युधः ॥ अमी वाहा अश्वाः निद्रां विहाय पुरोगतानि स्थितानि लेह्यानि आस्वाद्यानि सैंधवशिलाशक
लानि ॥ सैंधवोऽस्त्री शीतशिवं मणिमंथं च सिंधुजमित्यमरः ॥ वक्त्रोष्मणा मुखमारुतेन मलिनयंति म

॥ दीर्घेष्वमी नियमिताः पटमंडपेषु निद्रां विहाय वनजाक्ष वनायुदेश्याः ॥ वक्त्रोष्मणा मलिनयंति पु
॥ रोगतानि लेह्यानि सैंधवशिलाशकलानि वाहाः ॥ ७३ ॥ भवति विरलभक्तिर्म्लानपुष्पोपहारः स्वकि
॥ रणपरिवेषोद्भेदशून्याः प्रदीपाः ॥

लिनानि कुर्वंति ॥ उक्तं च सिद्धयोगसंग्रहे ॥ पूर्वाह्णकाले वाश्वा
नां प्रायशो लवणं हितं ॥ शूलानाहविबंधघ्नं लवणं सैंधवं वरमित्यादि ॥ ७३ ॥ भवतीति ॥ म्लानपुष्पो
पहारः ॥ पुष्पपुंज्या म्लानत्वाद्देवविरलभक्तिर्विरलरचनो भवतीति ॥ प्रदीपाश्च स्वकिरणानां परिवेष
स्य मंडलस्योद्भेदेन स्फुरणेन शून्याः भवंति निस्तेजस्का भवंतीत्यर्थः ॥ ॥ अपि चायं मंजुवाक् मधुरस्वनः ॥

थपंजरस्थस्तेन तव शुकस्त्वत्प्रबोधनिमित्ते प्रयुक्तामुच्चारितां नोऽस्माकं गिरं वाणीमनुवदत्यनुकरोतीति
अर्थः॥ इत्थं प्रभातलिंगानि वर्ण्यन्ते ततः प्रबोधव्यमिति भावः॥ ७४॥ इतीति॥ ॥ इतीत्थं विरचितवाग्भिर्बंदिपु
त्रैर्वैतालिकैः पुत्रग्रहणं समानवयस्कत्वद्योतनार्थं॥ सपदि विगतनिद्रः कुमारः तल्पं शय्यां॥ तल्पं श
य्याट्टदारेष्वित्यमरः॥ उज्झांचकार विससर्ज॥ उज्झ त्यागे एतस्मादिजादेश्च गुरुमतो नृच्छ इत्याम्

॥ अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शुकस्ते मंजुवाक् पंजरस्थः॥ ७४॥ इति विरचि
॥ तवाग्भिर्बंदिपुत्रैः कुमारः सपदि विगतनिद्रस्तल्पमुज्झांचकार॥ मदपटुनिनदद्भिर्बोधितो राजहं
॥ सैः सुरगज इव गांगं सैकतं सुप्रतीकः॥ ७५॥ प्रत्ययः॥ कथमिव॥ मदेन पटु मधुरं यथा तथा निनदद्भिः॥ राजहंसैर्बोधितः सुप्रतीकाख्यः सुरगजः ईशानदिग्गजः गंगाया इदं गांगं सैकतं पुलिनमिव॥ तो
योत्थितं पुलिनं सैकतं सिकतामयमित्यमरः॥ सिकतासैकता स्याच्चेत्यण्प्रत्ययः॥ सुप्रतीकग्र
हणं प्रायशः कैलासवासिनस्तस्य नि[illegible] गंगातटविहरणसंभवादित्यनुसंधेयं॥ ७५॥ ॥ ॥

तत्
स्य

यं

अथेति॥ ॥अथोत्थानानंतरं अंचितानि रुचिराणि अक्षिपक्ष्माणि नेत्रलोमानि यस्य सोऽजः स्नानस्त्रे दृष्टं ॥अ
वगतं दिवसमुखोचितं प्रातःकालोचितं विधिमनुष्ठानं अवसाय्य समाप्य ॥ स्यरे ऐर्पतास्तुप्॥ कुशलैः प्रसा
धकैः नैपथ्यैर्विरचितः संपादितः अनुकूलः स्वयंवरोचितो वेषो नेपथ्यं यस्य स तथोक्तः सन् स्वयंवरस्थं मंड
पगतं क्षितिपसमाजं राजसमूहमगात् ॥ अगमत् ॥ इणो गा लुङीति गादेशः ॥ पुष्पिताग्रावृत्तमिदं ॥

॥ स्तथविधिमवसायसन्नागस्त्रे दृष्टं दिवसमुखोचितमंचिताक्षिपक्ष्मा ॥ कुशलविरचितानुरूपवेषः
॥ क्षितिपसमाजमगात्स्वयंवरस्थं ॥ ७६ ॥ ॥ इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ
॥ स्वयंवराभिगमनो नाम पंचमः सर्गः ॥ ५ ॥

तडकं ॥ अयुजिनयुगरेफतो यकारो युजि च नजौ ज
रगाश्च पुष्पिताग्रेति ॥ ७६ ॥ ॥ इति श्रीपदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलाचल
मल्लिनाथसूरीविरचितायां रघुवंशव्याख्यायां संजीविनीसमाख्यायां पंचमः सर्गः ॥ ५ ॥ ॥

॥इतिरघुवंशापंचमसर्गसमाप्तः॥ छ

[OrderDescription]
,CREATED=04.12.19 13:57
,TRANSFERRED=2019/12/04 at 14:23:56
,PAGES=183
,TYPE=STD
,NAME=S0002293
,Book Name=M-2265-RAGHUVANSHAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF

FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF

FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF

FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF

FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF

FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF

FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF

FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF

FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF

FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF

FILE182=00000182.TIF
,FILE183=00000183.TIF
,